.. shrI siddhAnta shikhAmaNi ..

# ॥ श्री सिद्धान्त शिखामणि ॥

श्री जगद्गुरु पञ्चाचार्याः प्रसीदन्तु प्रस्तावन
श्री जगद्गुरु पञ्चाचार्याः प्रसीदन्तु
जीयात् श्री रेणुकाचार्यो शिवाचार्य शिखामणिः ।
योमाहेश्वर सिद्धान्तं स्थापयामास भूतले ॥
यस्यस्मरण मात्रेन नृणां मुक्तिकरेस्थिता ।
तम्वन्देजगदाधारं रेणुकार्यं जगद्गुरुं ॥
मुनियाचनया शिवाज्ञया शिवभक्त्युद्धरणार्थमागतं ।
वृषराज परावतारता महितं श्री बसवेश्वरं भजे ॥
नमो उग्रस्वरूपाय नमो जिष्ण्वादि शात्रवे ।
दक्षयज्ञविनाशाय वीरभद्रायतेनमः ॥

अथ श्री शिवयोगि शिवाचार्य विरचित श्री सिद्धान्त शिखामणिः ।

प्रथम परिच्छेदः
त्रैलोक्यसम्पदालेख्य समुल्लेखनभित्तये ।
सच्चिदानन्द रूपाय शिवायब्रह्मणे नमः ॥ १.१॥
ब्रह्मेतिव्यपदेशस्य विषयं यम्प्रचक्षते ।
वेदान्तिनो जगन्मूलं तं नमामि परमशिवं ॥ १.२॥
यस्योर्मिबुद्बुदाभासः षट्त्रिंशत्तत्त्वसञ्चयः ।
निर्मलं शिवनामानं तं वन्दे चिन्महोदधिं ॥ १.३॥
शिवस्तुतिः
यद्भासा भासते विश्वं यत्सुखेनानुमोदते ।
नमस्तस्मै गुणातीत विभवाय परात्मने ॥ १.४॥
सदाशिव मुखाशेष तत्त्वोन्मेषविधायिने ।
निष्कलङ्कस्वभावाय नमः शान्ताय शम्भवे ॥ १.५॥
स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने ।
स्वेच्छाकृतत्रिलोकाय नमः शान्ताय शम्भवे ॥ १.६॥
यत्र विश्राम्यतीशत्वं स्वाभाविक मनुत्तमं ।
नमस्तस्मै महेशाय महादेवायशूलिने ॥ १.७॥
यामहुः सर्वलोकानां प्रकृतिं शास्त्रपारगाः ।
तां धर्म चारिणीं शम्भोः प्रणमामि परां शिवां ॥ १.८॥
शक्तिस्तुतिः


From http://sanskritdocuments.org

यया महेश्वरः शम्भुर्नामरूपादिसण्युतः ।
तस्यै मायास्वरूपायै नमः परमशक्तये ॥ १.९ ॥
शिवाद्यादिनमुत्पन्ना शान्त्यतीतपदोत्तरा ।
मातरं तां समस्तानां वन्दे शिवकरीं शिवां ॥ १.१० ॥
इच्छाज्ञानादिरूपेण या शम्भोर्विश्वभाविनी ।
वन्दे तां परमानन्दप्रबोधलहरीं शिवां ॥ १.११ ॥
अमृतार्थं प्रपन्नानां या सुविद्या प्रदायनी ।
अहर्निशमहं वन्दे ता मीशानमनोरमां ॥ १.१२ ॥

ग्रन्थकर्तृ वंशवर्णनं

असीदा चारसिद्धानामग्रणीः शिवयोगीनां ।
शिवयोगीति विख्यातः शिवज्ञान महोदधिः ॥ १.१३ ॥
शिवभक्ति सुधासिन्धुजृम्भणामल चन्द्रिका ।
भारती यस्य विदधे प्रायः कुवलयोत्सवं ॥ १.१४ ॥
तस्य वंशे समुत्पन्नो मुक्तामणिरिवामलः ।
मुद्दिदेवाभिधाचार्यो मूर्धन्यः शिवयोगीनां ॥ १.१५ ॥
मुद्दनात् सर्वजन्तूनां प्रणतानां प्रबोधतः ।
मुद्ददेव इति ख्याता समाख्या यस्य विश्रुता ॥ १.१६ ॥
तस्यासीन्नन्दनः शान्तः सिद्ध नाथाबिधः शुचिः ।
शिव सिद्धान्त निर्णेता शिवाचार्यः शिवात्मिकः ॥ १.१७ ॥

श्री शिवयोगि शिवाचार्य वर्णनं

वीरशैव शिखारत्नं विशिष्टाचारसम्पदं ।
शिवज्ञान महासिन्धुं यं प्रशंसन्ति देशिकाः ॥ १.१८ ॥
यदाचार्यकुले जाता सतामाचारमातृका ।
शिवभक्तिः स्थिरा यस्मि जज्ञे विगत विप्लवा ॥ १.१९ ॥
तस्य वीरशिवाचार्य शिखारत्नस्य नन्दनः ।
अभवच्छिवयोगीति सिन्धोरिव सुधाकरः ॥ १.२० ॥
चिदानन्द पराकाश शिवानुभवयोग्यतः ।
शिवयोगीति ना मोक्ति र्यस्य याथार्थ्ययोगिनी ॥ १.२१ ॥
शिवागम परिज्ञान परिपाक सुगन्धिना ।
यदीयकीर्ति पुष्पेण वासितं हरितां मुखं ॥ १.२२ ॥
येन रक्षावती जाता शिवभक्तिः सनातनी ।
बौद्धादिप्रतिसिद्धान्त महाध्वान्तांशुमालिना ॥ १.२३ ॥
स महावीर शैवानां धर्ममार्ग प्रवर्तकः ।
शिवतत्त्व परिज्ञान चन्द्रिका वृत चन्द्रमाः ॥ १.२४ ॥
आलोक्य शैवतन्त्राणि कामिकाद्यानि सादरं ।
वातुलान्तानि शैवानि पुराणा न्यखिलानि तु ॥ १.२५ ॥


From http://sanskritdocuments.org

वेदमार्गा विरोधेन विशिष्टाचार सिद्धये ।
असन्मार्ग निरासाय प्रमोदाय विवेकिनां ॥ १.२६ ॥
सर्वस्वं वीरशैवानां सकलार्थ प्रकाशकं ।
असृष्टमखिलैर्दोषैरादृतं शुद्धमानसैः ॥ १.२७ ॥
शैवागमेषु सर्वेषु पुराणे ष्वखिलेषु च ।
पुरा देवेन कथितं देव्यै तन्नन्दनाय च ॥ १.२८ ॥
तत्सम्प्रदायसिद्धेन रेणुकेन महात्मना ।
गणेश्वरेण कथितमगस्त्याय पुनः क्षितौ ॥ १.२८ ॥
वीरशैव महातन्त्र मेकोत्तरशतस्थलं ।
अनुग्रहाय लोकानामभ्यधात् सुधियां वरः ॥ १.२९ ॥
सर्वेषां शैवतन्त्राणा मुत्त रत्वान्निरुत्तरं ।
नाम्ना प्रतीयते लोके मत्सिद्धान्तशिखामणिः ॥ १.३० ॥
अनुगत सकलार्थे शैवतन्त्रैः नमस्तेः ।
प्रकटितशिवबोधाद्तैत भाव प्रसादे ॥ १.३१ ॥
विदधतु मतिमस्मिन् वीरशैवा विशिष्टाः ।
पशुपतिमत सारे पण्डितश्लाघनीये ॥ १.३२ ॥
इति श्री सिद्धान्त शिखामणौ शिवयोगि शिवाचार्य
वंशवर्णनं नाम प्रथम परिच्छेदः परिसमाप्तः ॥१॥

---

द्वितिय परिच्छेदः
जगत्सृष्टि विचारः

सच्चिदानन्दरूपाय सदसद्व्यक्ति हेतवे ।
नमः शिवाय साम्बाय सगणाय स्वयम्भुवे ॥ २.१ ॥
सदाशिव मुखा शेष तत्त्व मौक्तिकशुक्तिकां ।
वन्देमाहेश्वरीं शक्तिं महामायादिरूपिणीं ॥ २.२ ॥
अस्ति सच्चित्सुखाकारमलक्षण पदास्पदं ।
निर्विकल्पं निराकारं निरस्ता शेष विप्लवं ॥ २.३ ॥
परिच्छेदकथाशून्यं प्रपञ्चातीतवैभवं ।
प्रत्यक्षादि प्रमाणा नामगोचरपदे स्थितं ॥ २.४ ॥
स्वप्रकाशं पराकाशमनौपम्यमनामयं ।
सर्वज्ञं सर्वगं शान्तं सर्वशक्ति निरङ्कुशं ॥ २.५ ॥
शिवरुद्र महादेवभवादि पदसंज्ञिकं ।
अद्वितीयमनिर्देश्यं परं ब्रह्म सनातनं ॥ २.६ ॥
तत्र लीनमभूत् पूर्वं चेतनाचेतनं जगत् ।
स्वात्मालीनं जगत्कार्यं स्वप्रकाश्यं तदद्भुतं ॥ २.७ ॥
शिवाभिदं परम्ब्रह्म जगन्निर्मातुमिच्छया ।


From http://sanskritdocuments.org

स्वरूपमादधे किञ्चित् सुखस्फूर्ति विजृंभितं ॥ २.८ ॥
निरस्तदोष सम्बन्धं निरुपाधिक मव्ययं ।
दिव्यमप्राकृतं नित्यं नीलकण्ठं त्रिलोचनं ॥ २.९ ॥
चन्द्रार्थशेखरं शुद्धं शुद्धस्फटक सन्निभं ।
शुद्धमुक्ता फलाभासमुपास्यं गुणमूर्तिभिः ॥ २.१० ॥
विशुद्धज्ञानकरणं विषयं सर्व योगीनां ।
कोटिसूर्यप्रतीकाशं चन्द्रकोटि समप्रभं ।
अप्राकृत गुणाधारमनन्तमहिमास्पदं ॥ २.११ ॥
तदीय परमाशक्तिः सच्चिदानन्दलक्षणा ।
समस्त लोकनिर्माण समवायस्वरूपिणी ।
तदिच्छयाभवत् साक्षात् तत्स्वरूपानुकारिणी ॥ २.१२ ॥
सशम्भुर्भगवान् देवः सर्वज्ञः सर्वशक्तिकः ।
जगत्सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनां ।
कर्तारं सर्वलोकानं विदधे विश्वनायकः ॥ २.१३ ॥
तस्मै प्रथमपुत्राय शङ्करः शक्तिमान् विभुः ।
सर्वज्ञः सकला विद्याः सानुग्रहमु पादिशत् ॥ २.१४ ॥
प्राप्तविद्यो महादेवाद्ब्रह्म विश्वनियामकात् ।
समस्तलोक निर्माण समुद्योग परोभवत् ॥ २.१५ ॥
कृतो द्योगोन पि निर्माणे जगतां शङ्कराज्ञया ।
अज्ञातो पायसम्पत्ति रभवन्मा ययावृतः ॥ २.१६ ॥
विधातुमखिलान् लोकानुपायं प्राप्तुमिच्छया ।
पुनस्तं प्रार्थयामास देवदेवं त्रिलोचनं ॥ २.१७ ॥
नमस्ते देवदेवेश नमस्ते करुणाकर ।
अस्मदादिजगज्जालनिर्माण विधिषु क्षमः ॥ २.१८ ॥
उपायं वद मे शम्भो जगत्सृष्टौ जगत्पते ।
सर्वज्ञः सर्वशक्तिस्त्वं सर्वकर्तासनातनः ॥ २.१९ ॥
इति सम्प्रार्थितः शम्भुर्ब्रह्मणा विश्वनायकः ।
उपायमीरद तस्मैलोकसृष्टि प्रवर्तकं ॥ २.२० ॥
उपायमीश्वरेणोक्तं लब्ध्वापि चतुराननः ।
न समर्थो भवत्कर्तुं नानारूपमिदं जगत् ॥ २.२१ ॥
पुनस्तं प्रार्थयामस ब्रह्मा विह्वलमानसः ।
देवदेव महादेव जगत्प्रथमकारण ॥ २.२२ ॥
नमस्ते सच्चिदानन्द स्वेच्छा विग्रहराजित ।
भव शर्व महेशान सर्वकारण कारण ॥ २.२३ ॥
भवदुक्तोव्युपायो मेन किञ्चिद् ज्ञायते धुना
सृष्टिं विधेहि भगवन् प्रथमं परमेश्वर



From http://sanskritdocuments.org

ज्ञातो पायस्ततः कुर्यां जगसृष्टि मुमापते ॥ २.२४॥
इत्येवं प्रार्थितः शम्भुर्ब्रह्मणा विश्वयोनिना ।
ससर्जात्म समप्रख्यान् सर्वज्ञान् सर्वशक्तिकान् ॥ २.२५॥
प्रबोध परमानन्द परिवाहित मानसान् ।
प्रमथान् विश्वनिर्माण प्रलयादि विधिक्षमान् ॥ २.२६॥
सृष्ट प्रमथवर्गेषु वर्णाश्रम परिक्रमान् ।
अप्राकृत सदाचारा नुपादिश दथ प्रभुः ॥ २.२७॥
इति श्री सिद्धान्त शिखामणौ जगत्सृष्टि विचारो नाम
द्वितीय परिच्छेदः परिसमाप्तः ॥२॥

---

तृतिय परिच्छेदः

कदाचिदथ कैलासे कलधौत शिलामये ।
गन्धर्व वामनयना क्रीडामौक्तिदर्पणे ॥ ३.१॥
मन्दारबकुलाशोक माकन्दप्राय भूरुहे ।
मल्ली मरन्दनिष्यन्दपान पीनमधुप्रते ॥ ३.२॥
कुङ्कुमस्तबकामोदकूलङ्कष हरिन्मुखे ।
कलकण्ठकुलालापकन्दल द्रागबन्धुरे ॥ ३.३॥
किन्नरीगीत माधुर्य परिवाहित गह्वरे ।
सानन्द वरयोगीन्द्र बृन्दालङ्कृतकन्धरे ॥ ३.४॥
हेमारविन्दकलिकासुगन्धिरसमानसे ।
शातकुम्भमयोत्तुङ्ग शतस्तम्भ विराजिते ॥ ३.५॥
माणिक्य दीपकलिकामरीचिद्योति तान्तरे ।
द्वारतोरण सम्रूढशङ्खपद्म निधिद्वये ॥ ३.६॥
मुक्ता तारकितो दार वितानाम्बरमण्डिते ।
स्पर्शलक्षितवैडूर्यमयभित्ति परम्परे ॥ ३.७॥
सञ्चरत्प्रमथश्रेणी पदवाबालनूपुरे ।
प्रवाल वलभीशृङ्ग शृङ्गारमणि मण्टपे ॥ ३.८॥

शिववर्णनं

वन्दारुदेवमकुट मन्दार रसवासितं ।
रत्न सिम्हासनं दिव्यमध्यस्तं परमेश्वरं ॥ ३.९॥
तमास्थानगतं देवं सर्वलोकमहेश्वरं ।
त्र्य्यन्तकमलारण्य विहारकलहंसकं ॥ ३.१०॥
उदारगुण मोङ्कारशुक्तिकापुटमौक्तिकं ।
सर्वमङ्गल सौभाग्यसमुदाय निकेतनं ॥ ३.११॥
संसार विषमूर्छाल जीवनं जीवनौषधं ।
नित्यप्रकाश नैर्मल्यं कैवल्य सुरपादपं ॥ ३.१२॥



From http://sanskritdocuments.org

अनन्तपरमानन्दमकरन्दमधुव्रतं ।
आत्मशक्तिलता पुष्यत्त्रिलोकीपुष्पकोरकं ॥ ३.१३॥
ब्रह्माण्डकुण्डिकाषण्डपिण्डीकरण पण्डितं ।
समस्तदेवता चक्रचक्रवर्ति पदे स्थितं ॥ ३.१४॥
चन्द्रबिम्बायुत च्छायादायादद्युतिविग्रहं ।
माणिक्य मुकुट ज्योतिर्मञ्जरीपिञ्जराम्बरं ॥ ३.१५॥
चूडालं सोमकलया सुकुमारबिसाभया ।
कल्याण पुष्पकलिकाकर्ण पूरमनोहरं ॥ ३.१६॥
मुक्तावलयसम्बद्धरुण्डमाला विराजितं ।
पर्याप्त चन्द्रसौन्दर्य परिपन्थिमुखश्रियं ॥ ३.१७॥
प्रातः सम्पुल्ल कमल प्रतीकाशत्रिलोचनं ।
मन्दस्मितमितालापमधुराधरपल्लवं ॥ ३.१८॥
गण्डमण्डल पर्यन्तक्रीडन्म कर कुण्डलं ।
कालिम्ना कालकूटस्य कण्ठनाले कलङ्कितं ॥ ३.१९॥
मणिकङ्कण केयूर मरीचिकर पल्लवैः ।
चतुर्भिः सम्विराजन्तं बाहु मन्दार शाखिभिः ॥ ३.२०॥
गौरीपयोधराश्लेषकृतार्थभुजमध्यमं ।
सुवर्ण ब्रह्म सूत्राङ्कं सूक्ष्मकौशेयवासनं ॥ ३.२१॥
नाभिस्थानावलम्बिन्या नवमौक्ति कमालया ।
गङ्गयेव कृताश्लेषं मौलिभागवतीर्णया ॥ ३.२२॥
पदेन मणि मञ्जीर प्रभापल्लवितश्रिया ।
चन्द्रवत् स्फाटिकं पीठं समावृत्य स्थितं पुरः ॥ ३.२३॥

शक्तिवर्णनं

वामपार्श्व निवासिन्या मङ्गल प्रिय वेषया ।
समस्तलोक निर्माण समवायस्वरूपया ॥ ३.२४॥
इच्छाज्ञानक्रिया रूपबहुशक्ति विलासया ।
विद्यातत्त्वप्रकाशिन्या विनाभाव विहीनया ॥ ३.२५॥
संसार विषकान्तार दाहवादग्नि लेखया ।
धम्मिल्ल मल्लिकामोदझुङ्कुर्वद्भृङ्ग मलया ॥ ३.२६॥
सम्पूर्ण चन्द्र सौभाग्य सम्वादि मुख पद्मया ।
नानामौक्तिकलावण्य नासीरस्मित शोभया ॥ ३.२७॥
मणिताटङ्क रङ्गातर्वलिता पाङ्गलीलया ।
नेत्रद्वितयसौन्दर्य निन्दितेन्दीवरत्विषा ॥ ३.२८॥
कुसुमायुधकोदण्ड कुटिल भ्रूविलासया ।
बन्धूककुसुमच्छाया बन्धुभूताधरश्रिया ॥ ३.२९॥
कण्ठनालजितानङ्गकम्बुबिब्बोक सम्पदा ।



From http://sanskritdocuments.org

बाहुद्वितय सौभाग्यवञ्चितोत्पलमालया ॥ ३.३०॥
स्थिरयौवनलावण्य शृङ्गारितशरीरया ।
अत्यन्तकठिनोत्तुङ्ग पीवरस्तनभारया ॥ ३.३१॥
मृणालवल्लरीतन्तु बन्धु भूतवलग्नया ।
शृङ्गारतटीनीतुङ्ग पुलिन श्रोणि भारया ॥ ३.३२॥
कुसुम्भ कुसुमच्छाया कोमलाम्बर शोभया ।
शृङ्गारोद्यानसम्रम्भान्तम्भोरुकाण्डया ॥ ३.३३॥
चूतप्रवालसुषमासुकुमार पदाब्जया ।
स्थिर मङ्गलशृङ्गार भूषणालङ्कृताङ्गया ॥ ३.३४॥
हारनूपुर केयूर चमत्कृतशरीरया ।
चक्षुरानन्दलतया सौभाग्य कुलविद्यया ॥ ३.३५॥
उमया सममासीनं लोकजालकुटुम्बया ।
अपूर्व रूप मभवजन् परिवाराः समन्ततः ॥ ३.३६॥

देवतासमूहकृत शिवसेवा वर्णनं

पुण्डरीकाकृति स्वच्छं पूर्ण चन्द्रसहोदरं ।
दधौ तन्य महालक्ष्मीः सिति मातपवारणं ॥ ३.३७॥
तन्त्रीझङ्कारशालिन्या सङ्गीतामृत विद्यया ।
उपतस्थे महादेवमुपान्तेच सरस्वती ॥ ३.३८॥
झणत्कङ्कणजातेन हस्तेनोपनिषद्वधूः ।
ओङ्कारतालवृन्तेन वीजयामास शङ्करं ॥ ३.३९॥
चलच्चामरिकाहस्ता झङ्कुर्वन्मणिकङ्कणाः ।
असेवन्त तमीशानमभितो दिव्यकन्यकाः ॥ ३.४०॥
चामराणां विलोलानां मध्ये तन्मुखमण्डलं ।
रराज राजहंसानां भ्रमतामिव पङ्कजं ॥ ३.४१॥
मन्त्रेण तमसेवन्त वेदाः साङ्गविभूतयः ।
भक्त्या चूडामणिं कान्तं वहन्त इव मौलिभिः ॥ ३.४२॥
तदीय युध धारिण्यतत्समानविभूषणाः ।
अङ्गभूताः स्त्रियः काश्चिदासेवन्त तमीश्वरं ॥ ३.४३॥
आप्ताधिकारिणः केचिदनन्त प्रमुखा आपि ।
अष्टौ विद्येश्वरा देवमभजन्त समन्ततः ॥ ३.४४॥
ततो नन्दी महाकाश्चण्डो भृङ्गिरिटिस्ततः ।
घण्टाकर्णः पुष्पदन्तः कपाली वीरभद्रकः ॥ ३.४५॥
एवमद्या महाभागा महाबलपराक्रमाः ।
निरङ्कुश महस्तत्वा भेजिरे तं महेश्वरं ॥ ३.४६॥
अणिमादिकमैश्वर्यं येषां सिद्धेरपोहनं ।
ब्रह्मादयः सुरा येषा माज्ञालङ्घनबीरवः ॥ ३.४७॥



From http://sanskritdocuments.org

मोक्षलक्ष्मी परिष्वङ्ग मुदिता येतरात्मना ।
येषामिषत्करं विश्ववर्गसम्हार कल्पनं ॥ ३.४८ ॥
ज्ञानशक्ति परा येषां पर्व वस्तु प्रकाशिनी ।
आनन्दकणिका येषां हरिब्रह्मादि सम्पदः ॥ ३.४९ ॥
आकाङ्क्षन्ते पदं येषां योगिनो योगतत्पराः ।
काङ्क्षणीयफलो येषां सङ्कल्पः कल्प पादपः ॥ ३.५० ॥
कर्मकालादि कार्पण्यचिन्ता येषान्न विद्यते ।
येषां विक्रमसन्नाहोमृत्योरपि च मृत्यवः ।
ते सारूप्य पदं प्राप्ताः प्रमथा भेजिरे शिवं ॥ ३.५१ ॥
ब्रह्मोपेन्द्रमहेन्द्राद्या विश्वतन्त्राधिकारिणं ।
आयुधालङ्कृतप्रान्ताः परितस्तं सिषेविरे ॥ ३.५२ ॥
आदित्या वसवो रुद्रा यक्ष गन्धर्व किन्नराः ।
दानवा राक्षसा दैत्याः सिद्धा विद्याधरोरगाः ।
अभजन्त महादेवमपरिच्छिन्नसैनिकाः ॥ ३.५३ ॥
वसिष्ठो वामदेवश्च विश्वामित्रा त्रिशौनकाः ।
दधीचिर्गौतमश्चैव सानन्दशुक नारदाः ॥ ३.५४ ॥
उपमन्युभृगुव्यासपराशरमरीचयः ।
इत्याद्या मुनयः सर्वे नीलकण्ठं निषेविरे ॥ ३.५५ ॥
पार्श्वस्थपरिवाराणां विमलाङ्गेषु बिम्बितः ।
सर्वान्तर्गतमात्मानं स रेजे दर्शयन्निव ॥ ३.५६ ॥

श्री परमेश्वर राजव्यवहार वर्णनं

क्षणं स शम्भुर्देवानां कार्यभागं निरूपयन् ।
क्षणं गन्धर्व राजानां गानविद्या विभावयन् ॥ ३.५७ ॥
ब्रह्मविष्ण्वादिभिर्देवैः क्षणमालपमाचरन् ।
क्षणं देवमृगाक्षीणां लालयन् नृत्य विभ्रमं ॥ ३.५८ ॥
व्यासादीनं क्षणं कुर्वन् वेदोच्चारेषु गौरवं ।
निदधानः क्षणं देव्या मुखे बिम्बाधरे दृशः ।
हास्य नृत्यं क्षणं पश्यन् भृङ्गिणा परिकल्पितं ॥ ३.५९ ॥
नन्दिना वेत्रहस्तेन सर्वतन्त्राधिकारिणा ।
अमुञ्चता सदा पार्श्वमात्माभिप्राय वेदिना ॥ ३.६० ॥
चोदितानानयन् कांश्चिद्विसृजन् भ्रूविलानतः ।
सम्भावयंस्तथा चान्यानन्यानपि नियामयन् ॥ ३.६१ ॥
समस्त भुवनाधीश मौलिलालितशासनः ।
अकुण्ठितशक्तिरव्याजलावण्य ललिता कृतिः ॥ ३.६२ ॥
स्थिरयौवन सौरभ्यशृङ्गारितकलेवरः ।
आत्मशक्त्य मृतास्वादरसोल्लासित मानसः ॥ ३.६३ ॥


From http://sanskritdocuments.org

स्वाभाविकमहैश्वर्य विश्रान्ति परमावधिः ।
निष्कलङ्क महासत्त्व निर्मितानेक विग्रहः ॥ ३.६४॥
अखण्डारतिदोर्दण्डकण्डू खण्डन पण्डितः ।
चिन्तामणि प्रसन्नानां श्री कण्ठ परमेश्वरः ॥ ३.६५॥
सभान्तरगतं तन्त्रं रेणुकं गणनायकं ।
प्रसादं सुलभं दातुमाहूयेत्थं समादिशत् ॥ ३.६६॥
श्री रेणुक गणेश्वरं प्रति शिवादेश
श्रीशैलोस्योत्तरे भागे त्रिलिङ्गविषये शुभे ।
कुल्यपाकाभिदं पुण्यक्षेत्रमेकं विराजते ॥ ३.६७॥
सोमेश्वराभिदानस्य तत्रवासवतो मम ।
अस्पृशन्मानुषं भावं लिङ्गात् प्रादुर्भविष्यसि ॥ ३.६८॥
मदीयलिङ्ग सम्भूतं मद्भक्तपरिपालकं ।
विस्मिता मानुषाः सर्वेत्वां भजन्तु मदाज्ञया ॥ ३.६९॥
मदद्वैत परं शास्त्रं वेदवेदान्त सम्मतं ।
स्थापयिष्यसि भूलोके सर्वेषां हितकारकं ॥ ३.७०॥
ममप्रतापमतुलं मद्भक्तानां विशेषतः ।
प्रकाशाय महीभागे वेदमार्गानुसारतः ॥ ३.७१॥
इत्युक्त्वा परमेश्वरःस भगवा भद्रासनादुत्थितो ।
ब्रह्मोपेन्द्र मुखान्विसृज्य विबुधा भ्रूसंज्ञया केवलं ॥ ३.७२॥
पार्वत्या सहित्योगणैरभिमतै! प्रापस्वमन्तःपुरं ।
क्षोर्णीभागमवातरत्पशुपते राज्ञावशा द्रेणुकः ॥ ३.७३॥
इति श्री सिद्धान्त शिखामणौ शिव सभावर्णनं नाम
तृतिय परिच्छेदः परिसमाप्तः ॥३॥

---

चतुर्थ परिच्छेदः
श्री रेणुकागणाधीश्वर लिङ्गावतार वर्णनं
अथ त्रिलिङ्गविषये कुल्यपाकाभिदे स्थले ।
सोमेश्वर महालिङ्गात् प्रादुरासीत् स रेणुकः ॥ ४.१॥
प्रादुर्भूतं तमालोक्य शिवलिङ्गात्त्रि लिङ्गजाः ।
विस्मिताः प्राणिनः सर्वे बभूवुरतितेजसं ॥ ४.२॥
भस्मोद्धूलितसर्वाङ्गं साररुद्राक्ष भूषणं ।
जटामकुटसण्युक्तं त्रिपुण्ड्राङ्कितमस्तकं ॥ ४.३॥
कटीतटपटी भूतकन्थापटल बन्धुरं ।
दधान योगदण्डं च भस्माधारं कमण्डलं ॥ ४.४॥
शिवाद्वैत परिज्ञान परमानन्दमोदितं ।
निर्धूतसर्व संसार वासनादोष पञ्जरं ॥ ४.५॥


From http://sanskritdocuments.org

शिवागम सुधासिन्धु समुन्मेषसुधाकरं ।
चित्तरविन्दनं गूढ शिवपादाम्बुजद्वयं ॥ ४.६॥
यमादि योग तन्त्रज्ञं स्वतन्त्रं सर्व कर्मसु ।
समस्त सिद्ध सन्तान समुदाय शिखामणिं ॥ ४.७॥
वीरसिद्धान्त निर्वहकृत पट्टनिबन्धनं ।
आलोकमात्र निर्भिन्न समस्त प्राणिपातकं ॥ ४.८॥
तम पृच्छस् जनाः सर्वे समन्तः को भवानिति ।
इति पृष्टो महायोगि जनैर्विस्मितमानसैः ॥ ४.९॥
प्रत्युवाच शिवाद्वैत महानन्द परायणः ।
पिनाकिनः पार्श्ववर्ती रेणुकाख्यो गणेश्वरः ॥ ४.१०॥
शिवादेशानुसारेण शिवलिङ्गादिहभवं ।
नाम्ना रेणुकसिद्धो हं सिद्ध सन्तान नायकः ।
स्वच्छन्दचारी लोकेस्मि शिव सिद्धान्त पालकः ॥ ४.११॥
इत्युक्त्वापश्यतां तेषां विषयस्थिर चक्षुषां ।
उत्थाय व्योममार्गेण मलयाद्रिमुपागमत् ॥ ४.१२॥

मलयाद्रिवर्णनं

नव चन्दन कान्तारकं दलन्मन्दमारुतं ।
अभङ्गुरभुजङ्ग स्त्री सङ्गीतरस सकुलं ॥ ४.१३॥
करिपोतकराकृष्टस्फुरदेला तिवासितं ।
वराहदम्ष्ट्रिकाध्वन्तमुस्तासुरभिकन्दरं ॥ ४.१४॥
पटीरदलपर्यङ्कप्रसुप्तव्याददम्पतिं ।
माधवी मल्लिका जातीमञ्जरी वेणु रञ्जितं ॥ ४.१५॥
तत्र कुत्रचिदाभोगे सर्वर्तुकुसुमद्रुमे ।
अपश्यादश्रमं दिव्यमगस्तस्य महामुनेः ॥ ४.१६॥

अगस्त्यमहर्षि आश्रम वर्णनं

मन्दारचन्दन प्रायैर्मण्डितं तरुमण्डलैः ।
शाख शिखरसन्लीन तारकागण कोरकैः ॥ ४.१७॥
मुनिकन्यकरानीतकल शाम्बु विवर्धितैः ।
अलवालजलास्वादमोदमानमृगीगणैः ॥ ४.१८॥
हेमारविन्द निष्यन्दमकरन्दसुगन्धिभिः ।
मरालालापवाचालवीचिमालामनोहरैः ॥ ४.१९॥
इन्दीवरवर ज्योतिरन्धीकृतहरिन्मुखैः ।
लोपामुद्रापद न्यासचरितार्थ तटाङ्कितैः ॥ ४.२०॥
हारनिहारकर्पूरहारहासामलोदकैः ।
नित्य नैमित्ति कस्नाननियमार्थैस्त पस्विनां ॥ ४.२१॥
प्रकृष्टमणिसोपानैः परिवीतं सरोवरैः ।



From http://sanskritdocuments.org

विमुक्त सत्त्व वैरस्यं ब्रह्मलोकमिवापरं ॥ ४.२२॥
हु यमानाज्य सन्तानधूमगन्धिमहास्थलं ।
शुकसम्वत्समारब्धश्रुतिशास्त्रोबृम्हणं ॥ ४.२३॥

अगस्त्यमहर्षि वर्णनं

तस्यमध्ये समासीनं मूले चन्दन भूरुहः ।
सुकुमारदल च्छाया वारितादित्यतेजसः ॥ ४.२४॥
तडित्पिङ्गजटाभारै स्त्रिपुण्ड्राङ्कितमस्तकैः ।
भस्मोद्धूलित सर्वाङ्गैः स्फुरद्रुद्राक्ष भूषणैः ॥ ४.२५॥
नववल्कलवासोभिर्नानानियमधारिभिः ।
परिवीतं मुनिगणैः प्रमथैरिव शङ्करं ॥ ४.२६॥
समुज्ज्वलज्जटाजालैस्तपः पादप पल्लवैः ।
स्फुरत्सौदामिनीकल्पैर्ज्वाला जालैरिवानलं ॥ ४.२७॥
विशुद्धभस्मकृतया त्रिपुण्ड्राङ्कितरेखया ।
तिस्रोतसेव सम्बद्धशिला भागं हिमाचलं ॥ ४.२८॥
भस्मालङ्कृत सर्वाङ्गं शशाङ्कमिव भूगतं ।
वसानं वल्कलं सव्यं बालातपसमप्रभं ॥ ४.२९॥
वडवाग्नि शिखाजालसमालीढमिवार्णवं ।
सर्वासामपि विद्यानां समुदायनिकेतनं ॥ ४.३०॥
न्यक्कृतप्राकृताहन्तं निरूढ शिवभावनं ।
तृणीकृत जगज्जालं सिद्दीनामुदयस्थलं ॥ ४.३१॥
मोहान्धकारतपनं मूलबोधमहीरुहं ।
ददर्शन महायोगिमुनिं कलश सम्भवं ॥ ४.३२॥

अगस्त्याश्रमागतस्य श्रीरेणुकगणेश्वरस्य पादपूजातथा
अगस्त्यं प्रतिकुशलप्रश्नः

तमागतं महासिद्धं समीक्ष्य कलशोद्भवः ।
गणेन्द्रं रेणुकाभिख्यं विवेद ज्ञानचक्षुषा ।
तस्यानुभावं विज्ञाय सहसैव समुत्थितः ॥ ४.३३॥
लोपामुद्राकरानी तैरुदकैरतिपावनैः ।
पादौ प्रक्षालयामान स तस्य शिव योगिनः ॥ ४.३४॥
सम्पूज्यं तं यथाशास्त्रं तन्नियोगपुरस्सरं ।
मुनिर्विनयनं पन्नो निषसादासनान्तरे ॥ ४.३५॥
समासीनं मुनिवरं सर्वतेजस्विनां विभुः ।
उवाच शान्ताया वाचा रेवणः सिद्ध शेखरः ॥ ४.३६॥
निर्विघ्नं वर्तसे किन्नु नित्या ते नियमक्रिया ।
अथवागस्त्य तेजस्विन् कुतः सुस्तेन्तरायकाः ॥ ४.३७॥
विन्ध्यो निरुद्धो भवता विश्वोल्लङ्घन विभ्रमः ।


From http://sanskritdocuments.org

नहुषो रोषलेशात्ते सद्यः सर्पत्वमागतः ॥ ४.३८॥
आचान्ता भवता पूर्वं पङ्कशेषाः वमोधयः ।
जीर्णस्ते जाठरे वह्नो दृप्तो वातापिदानवः ॥ ४.३९॥
एवम्विधानां चित्राणारि सर्वलोकातिशयिनां ।
कृत्यानान्तु भवान् कर्ताकस्तेगस्त्य समप्रभः ॥ ४.४०॥
शिवाद्वैत परानन्दप्रकाशान परायणं ।
भवन्तमेकं शंसन्ति प्रकृत्या सङ्गवर्जितं ॥ ४.४१॥
पुरा हैमावती सूनुवदत्ते षडावनः ।
शिवधर्मोत्तरं नामशास्त्रमीश्वरभाषितं ॥ ४.४२॥
भक्तिः शैवी महाघोरसंसार भयहारिणी ।
त्वयाराजस्वती लोके जातागस्त्य महामुने ॥ ४.४३॥
इति तस्यवचः श्रुत्वा सिद्धुप्य मुनि पुङ्गवः ।
गम्भीरगुणया वाचा बभाषे भक्ति पूर्तकं ॥ ४.४४॥

अगस्त्य महर्षि प्रार्थना

अहमेव मुनीन्द्राणां लालनीयोनस्मि सर्वदा ।
भवदागमसं पत्तिर्मां विना कस्य सम्भवेत् ॥ ४.४५॥
स्थिर मद्य शिवज्ञानं सिद्धामे तापनक्रिया ।
भवद्दर्शन पुण्येन स्थिरा मे मुनिराजता ॥ ४.४६॥
संसारसर्प दष्टानां मूर्छितानां शरीरिणां ।
कटाक्षस्तव कल्याणं समुज्जीव भेषजं ॥ ४.४७॥
समस्त लोक सन्दाहता पत्रयमहानलः ।
त्वत्पदाम्बुकणा स्वादादुपशाम्यति देहिनां ॥ ४.४८॥
रेणुकं त्वां विजानामि गणनाथं शिवप्रियं ।
अवतीर्णमिमां भूमिं मदनुग्रह काङ्क्षया ॥ ४.४९॥
भवादृशानां सिद्धानां प्रभोधध्वस्त जन्मनां ।
प्रवृत्तिरीदृशी लोके परानुग्रहकारिणी ॥ ४.५०॥
त्वन्मुखाच्छ्रोतुमिच्छामि सिद्धान्तं श्रुतिसम्मतं ।
सर्वज्ञ वद मे साक्षाच्छैवं सर्वार्थ साधकं ॥ ४.५१॥
सद्यः सिद्धिकरं पुंसां सर्वयोगीन्द्र सेवितं ।
दुराचारैर ना घ्रातं स्वीकृतं वेद वेदिभिः ।
शिवात्मैक्य महाबोधनसम्प्रदायप्रवर्तकं ॥ ४.५२॥
उक्त्वा भवान् सकलललो कमहोपकारं ।
सिद्धान्त सङ्ग्रहमनादृत बाह्य तन्त्रं ।
सद्यः कृतार्थयितुमर्हति दिव्य योगिन् ।
नानागमश्रवण वर्ति तसंशयं मां ॥ ४.५३॥
इति श्री सिद्धान्त शिखामणौ श्रीरेणुकागस्त्यसम्भाषण


From http://sanskritdocuments.org

प्रसङ्गोनाम चतुर्थ परिच्छेदः परिसमाप्तः ॥४॥

---

पञ्चम परिच्छेदः

अथागस्त्यवचः श्रुत्वा रेणुको गण नायकः ।
ध्यात्वा क्षणं महादेवं साम्बमाह समाहितः ॥ ५.१॥
अगस्त्य मुनिशार्दूल समस्तागमपारग ।
शिवज्ञानकरं वक्ष्ये सिद्धान्तं शृणु सादरं ॥ ५.२॥
अगस्त्य बहुधा ख्याताः सिद्धान्ता रुचिभेदतः ।
भिन्ना चारसमायुक्ता भिन्नार्थप्रतिपादकाः ॥ ५.३॥
साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
एतानि मानभूतानि न हन्तव्यानि युक्तिभिः ॥ ५.४॥
वेदः प्रधानं सर्वेषां साङ्ख्यादीनं महामुने ।
वेदानुसरणा देषं प्रमाणमिति निश्चितं ॥ ५.५॥
पाञ्चरात्रस्य साङ्ख्यस्य योगस्य च तथा मुने ।
वेदैक देश वर्तित्वं शैवं वेदमयं मतं ॥ ५.६॥
वेदैक देशवर्तिभ्यः साङ्ख्यादिभ्यो महामुने ।
सर्ववेदानु सारित्वाच्छैवतन्त्रं विशिष्यते ॥ ५.७॥
शैव तन्त्र मिति प्रोक्तं सिद्धान्ताख्यं शिवोदितं ।
सर्ववेदार्थरूपत्वात् प्रमाणं वेदवत्सदा ॥ ५.८॥
आगमा बहुदा प्रोक्ताः शिवेन परमात्मना ।
शैवं पाशुपतं सोमं लाकुलं चेति भेदतः ॥ ५.९॥
तेषु शैवं चतुर्भेदं तन्त्रं सर्व विनिश्चितं ।
वामं च दक्षिणं चैव मिश्रं सिद्धान्त संज्ञकं ॥ ५.१०॥
शक्ति प्रधानं वामाख्यं दक्षिणं भैरवात्मकं ।
सप्त मातृपरं मिश्रं सिद्धान्तं वेद सम्मतं ॥ ५.११॥
वेद धर्माभिधायित्वात् सिद्धान्ताख्यः शिवागमः ।
वेद बाह्य विरोधित्वा द्वेदसम्मत उच्छते ॥ ५.१२॥
वेद सिद्धान्तयोरैक्य मेकार्थ प्रतिपादनात् ।
प्रामाण्यं सदृशं ज्ञेयं पण्डितै रेतयोः सदा ॥ ५.१३॥
सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते ।
निर्दिष्टमुत्त रे भागे वीरशैवमतं परं ॥ ५.१४॥
विशब्दे नोच्यते विद्या शिवजीवैक्य बोधिका ।
तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः ॥ ५.१५॥
वेदान्त जन्यं यद् ज्ञानं विद्येति परिकीर्त्यते ।
विद्यायां रमन्ते यः स वीर इत्यभिधीयते ॥ ५.१६॥



From http://sanskritdocuments.org

विद्यायां शिवरूपायां रमन्ते ये विशेषतः ।
तस्मादेते महाभागा वीरशैवा इति स्मृताः ॥ ५.१७॥
विद्यायां रमन्ते यस्मायां हेयं श्वपद्रहेत् ।
अने नैव निरुक्तेन वीरमहेश्वर स्मृतः ॥ ५.१८॥
शैवैर्माहेश्वरैश्चैव कार्यमन्तर्बहिः क्रमात् ।
शिवो महेश्वर श्चेति नात्यन्तमिह भिद्यते ।
यथा तथान भिद्यन्ते शैवा महेश्वरा अपिः ॥ ५.१९॥
शिवाश्रितेषु तेशैवा ज्ञान यज्ञरतानरा ।
माहेश्वरा समाख्याताः कर्मयज्ञरताभुवि ।
तस्मादभ्यन्तरे कुर्युः शैवामाहेश्वराबहि ॥ ५.२०॥
वीरशैवास्तु षड्भेदाः स्थलधर्म विभेदतः ।
भक्तादिव्यवहारेण प्रोच्यन्ते शास्त्रपारगैः ॥ ५.२१॥
शास्त्रन्तु वीरशैवानां षड्विधं स्थलभेदतः ।
धर्मभेदसमायोगादधिकारि विभेदतः ॥ ५.२२॥
अदौ भक्तस्थलं प्रोक्तं ततो महेश्वर स्थलं ।
प्रसादिस्थल मन्यत्तु प्राणलिङ्गिस्थलं ततः ।
शरणस्थलमाख्यातं षष्टमैक्यस्थलं मतं ॥ ५.२३॥

भक्तस्थलं

भक्तस्थलं प्रवक्ष्यामि प्रथमं कलशोद्भव ।
तदवान्तर भेदांश्च समाहितमनाः शृणु ॥ ५.२४॥
शिवेभक्तिः समुत्पन्ना यस्यासौ भक्त उच्यते ।
तस्यानुष्ठेयधर्माणायुक्तिर्भक्त स्थलं मतं ॥ ५.२५॥
अवान्तरस्थलान्यत्र प्राहुः पञ्चदशोत्तमाः ।
पिण्डता पिण्डविज्ञानं संसारगुण हेयता ॥ ५.२६॥
दीक्षा लिङ्गधृतिश्चैव विभूतेरपिधारणं ।
रुद्राक्षधारणं पञ्चाक्षरजपस्तथा ॥ ५.२७॥
भक्तमार्गक्रिया चैवगुरोर्लिङ्गस्य चार्चनं ।
जङ्गमस्यतथा ह्येषां प्रासादस्वीकृतिस्तथा ॥ ५.२८॥
अत्र दानत्रयं प्रोक्तं सोपाधि निरुपाधिकं ।
सहजञ्चेति निर्दिष्टं समस्तागमपारगैः ।
एतानि शिवभक्तस्य कर्तव्यानि प्रयत्नतः ॥ ५.२९॥

१. पिण्डस्थलं

बहुजन्म कृतैः पुण्यैः प्रक्षीणे पापपञ्जरे ।
शुद्धान्तःकरणो देहि पिण्डशब्देन गीयते ॥ ५.३०॥
शिवशक्ति समुत्पन्ने प्रपञ्चेन स्मिन् विशिष्यते ।
पुण्याधिकं क्षीणपापः शुद्धात्मा पिण्डनामकः ॥ ५.३१॥



From http://sanskritdocuments.org

एकएव शिवः साक्षाच्चिदानन्दमयो विभुः ।
निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः ॥ ५.३२॥
अनाद्य विद्या सम्बन्धात्तदंशो जीवनामकः ।
देवतिर्यज्मनुष्यादिजातिभेदे व्यवस्थितः ।
मयी महेश्वरस्तेषां प्रेरको हृदिसंस्थितः ॥ ५.३३॥
चन्द्रकान्ते यथातो यं सूर्यकान्ते यथानलः ।
बीजे यथाङ्कुरः सिद्धस्तथात्मनि शिवः स्थितः ॥ ५.३४॥
गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्टा सनातनी ।
तद्वैषम्यात्स मुत्पन्ना तस्मिन् वस्तुत्रयाभिदा ॥ ५.३५॥
किञ्चत्सत्त्वरजोरूपं भोक्तृसंज्ञकमुच्यते ।
अत्यन्ततामसोपाधिर्भोज्यमित्यबिधीयते ॥ ५.३६॥
परतत्त्व मयोपाधिर्ब्रह्मचैतन्यमीश्वरः ।
भोक्ताभोज्यं प्रेरयिता वस्तुत्रयमिदंस्मृतं ॥ ५.३७॥
आत्र प्रेरयिता शम्भुः शुद्धोपाधिर्महेश्वरः ।
समिश्रोपाधयः सर्वे भोक्तारः पशवःस्मृता ।
भोज्यमव्यक्त मित्युक्तं शुद्धतामसरूपकं ॥ ५.३८॥
अत्यन्त गूढ चैतन्यं जडमव्यक्त मुच्यते ।
सर्वज्ञः प्रेरकः शम्भुः किञ्चिद् ज्ञो जीव उच्यते ॥ ५.३९॥
उपाधिः पुनराख्यातः शुद्धाशुद्धविभेदतः ।
शुद्धोपाधिः परामाया स्वाश्रयान् मोहकारिणी ॥ ५.४०॥
अशुद्धोपाधिरप्येवमविद्याश्रय मोहिनी ।
अविद्या शक्ति भेदेन जीवा बहुविधाः स्मृताः ॥ ५.४१॥
माया शक्ति वशादीशो नानामूर्ति धरःप्रभुः ।
सर्वज्ञः सर्वकर्ताच नित्यमुक्तो महेश्वरः ॥ ५.४२॥
किञ्चित्कर्ताच किञ्चिद् ज्ञोबद्धोनादिशरीरवान् ।
अविद्या मोहिता जीवा ब्रह्मैक्यज्ञान वर्जिता ॥ ५.४३॥
परिभ्रमन्ति संसारे निजकर्मानुसारतः ।
देवतिर्यज्मनुष्यादिनानायोनिविभेदतिः ॥ ५.४४॥
चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः ।
जात्यायुर्छोगवैषम्य कारणं कर्म केवलं ॥ ५.४५॥
एतेषां देहिनां साक्षि प्रेरकः परमेश्वरः ।
संसारे भ्रमतां नित्यं कर्म यन्त्र नियन्त्रिणे ॥ ५.४६॥
देहिनां प्रेरकः शम्भुर्हित मार्गोपदेशकः ।
पुनरावृत्ति रहित मोक्ष मार्गोपदेशकं ॥ ५.४७॥
स्वकर्म परिपाकेन प्रक्षीणमलवासनः ।
शिवप्रसादाज्जीवोयं जायते शुद्धमानसः ॥ ५.४८॥


From http://sanskritdocuments.org

शुद्धान्तः करणे जीवे शुद्धकर्म विपाकतः ।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी ।
जन्तुरन्त्य शरीरोसौ पिण्डशब्दाभिदेयकः ॥ ५.४९ ॥

२. पिण्डज्ञानस्थलं

शरीरात्म विवेकेन पिण्डज्ञानी सकथ्यते ।
शरीरमेव चार्वाकैरात्मेति परिकीर्त्यते ॥ ५.५०॥
इन्द्रियाणां तथात्मत्वमपरैः परिभाष्यते ।
बुद्धितत्त्वगतैर्बौद्धैर्बुद्धिरात्मेतिगीयते ॥ ५.५१॥
सेन्द्रियाणां न देहस्य न बुद्धेरात्मता भवेत् ।
अहम्प्रत्यय वेद्यत्वादनुभूतस्मृतेरपि ॥ ५.५२॥
शरीरेन्द्रिय बुद्धिभ्यो व्यतिरिक्तः सनातनः ।
आत्मस्थितिविवेकी यः पिण्डज्ञानी नकथ्यते ॥ ५.५३॥
नश्वराणि शरीराणि नानारूपाणि कर्मणा ।
आश्रितो नित्य एवासाविति जन्तोर्विवेकिता ॥ ५.५४॥
शरीरात्पृथगात्मानमात्मनः पृथगीश्वरं ।
प्रेरकं यो विजानाति पिण्डज्ञानी स कथ्यते ॥ ५.५५॥

३. संसारहेयस्थलं

निरन्तहृत्कलङ्कस्य नित्यानित्यविवेकिनः ।
संसार हे यता बुद्धिर्जायते वासनाबलात् ॥ ५.५६॥
ऐहिके क्षणिके सौख्ये पुत्रदारादि सम्भवे ।
क्षयित्यादियुते स्वर्गे कस्य वाण्छा विवेकिनः ॥ ५.५७॥
जातस्यहिध्रुवो मृत्युर्ध्रुवं जन्ममृत्यस्यच ।
जन्तुर्मरण जन्माभ्यां परिभ्रमति चक्रवत् ॥ ५.५८॥
मत्स्यकूर्म वराहाङ्गैर्नृसिम्हमनुजादिभिः ।
जातेन निधनं प्राप्तं विष्णुनापि महात्मना ॥ ५.५९॥
भूत्वा कर्मवशाज्जन्तुर्ब्राह्मणादिषु जातिषु ।
तापत्रय महावह्नि सन्तापाद्दह्यते भृशं ॥ ५.६०॥
कर्म मूलेन दुःखेन पीड्य मानस्य देहिनः ।
अध्यात्मिकादिना नित्यं कुत्र विश्रान्तिराप्यते ॥ ५.६१॥
आध्यात्मिकन्तु प्रधमं द्वितियञ्चादि भौतिकं ।
आधिदैविकमन्यच्च दुःखत्रयमिदं स्मृतं ॥ ५.६२॥
आध्यात्मिकं द्विधा प्रोक्तं बाह्याभ्यन्तर भेदतः ।
वातपित्तादिजं दुःखं बाह्यमाध्यात्मिकं मतं ।
रागद्वेषादि सम्पन्नमान्तरं परिकीर्त्यते ॥ ५.६३॥
आधिभौतिकमेतद्धि दुःखं राजादिभूतजं ।
आधिदैविकमाख्यातं ग्रहयक्षादि सम्भवं ॥ ५.६४॥


From http://sanskritdocuments.org

दुःखैरेतैरुपेतस्य कर्म बद्धस्य देहिनः ।
स्वर्गे वा यदि वा भूमौ सुखलेशोन विद्यते ॥ ५.६५॥
तटित्सु वीचि मलासु प्रदीपस्य प्रभासु च ।
सम्पत्सु कर्म मूलासुकस्य वा स्थिरतामतिः ॥ ५.६६॥
मलकोशे शरीरेस्मिन् महादुःखविवर्थने ।
तडिदङ्कुरसं काशे कोवा मोदेत पण्डितः ॥ ५.६७॥
नित्यानन्द चिदाकारमात्म तत्त्वं विहाय कः ।
विवेकी रमते देहे नश्वरे दुःख भाजने ॥ ५.६८॥
विवेकी शुद्धहृदयो निश्चितात्म सुखोदयः ।
दुःखहेतौ शरीरेस्मिन् कलत्रे च सुतेषुच ॥ ५.६९॥
सुहृत्सु बन्धुवर्गेषु धनेषु कुलपद्धतौ ।
अनित्य बुद्ध्या सर्वत्र वैराग्यं परमश्नुते ॥ ५.७०॥
विवेकिनो विरक्तस्य विषयेष्वात्मरागिणः ।
संसार दुःख विच्छेद हेतै बुद्धिः प्रवर्तते ॥ ५.७१॥
नित्यानित्यविवेकिनः सुकृतिनश्शुद्धाशय स्यात्मनोत्रः ।
ब्रह्मोपेन्द्रमहेन्द्रमुख्य विभवेष्व स्थायितास्पश्य ।
नित्यानन्दपदे निराकृतजगत्संसार दुःखोदये ।
साम्बे चन्द्रशिरोमणे समुदयेद्भक्ति र्भवध्वसिनी ॥ ५.७२॥
इति श्री सिद्धान्त शिखामणौ भक्तस्थले पिण्डादिस्थलत्रय
प्रसङ्गोनाम पञ्चम परिच्छेदः परिसमाप्तः ॥५॥

---

षष्ठपरिच्छेदः

४. गुरुकारुण्यस्थलं

ततो विवेक सम्पन्नो विरागी शुद्धमानसः ।
जिज्ञासुः सर्व संसारदोषध्वंसकरं शिवं ॥ ६.१॥
उपैति लोक विख्यातं लोभ मोह विवर्जितं ।
आत्मतत्त्व विचारज्ञं विमुक्त विषयभ्रमं ॥ ६.२॥
शिव सिद्धान्ततत्त्वज्ञं छिन्न सन्देह विभ्रमं ।
सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनं ॥ ६.३॥
कुलक्रमागताचारं कुमार्गाचारवर्जितं ।
शिवध्यानपरं शान्तं शिवतत्त्व विवेकिनं ॥ ६.४॥
भस्मोद्धूलननिष्णातं भस्मतत्त्व विवेकिनं ।
त्रिपुण्ड्रधारणोत्कण्ठं धृतरुद्राक्षमालिकं ॥ ६.५॥
लिङ्गधारण सण्युक्तं लिङ्गपूजापरायणं ।
लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनं ।


From http://sanskritdocuments.org

लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुंशिववादिनं ॥ ६.६॥
सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः ।
षण्मासान् वत्सरं वापि यावदेष प्रसीदति ॥ ६.७॥
प्रसन्नं परमाचार्यं भुक्तिमुक्तिप्रदायकं ।
प्रार्थयेदग्रतः शिष्यः प्राञ्जलिर्विनयान्वितः ॥ ६.८॥
भोकल्याण महाभाग शिवज्ञानमहोदधे ।
आचार्यवर्य सम्प्राप्तं रक्षमां भवरोगिणं ॥ ६.९॥
इति शुद्धेन शिष्येण प्रार्थितः परमोगुरुः ।
शक्तिपातं समालोक्य दीक्षया योजयेदमुं ॥ ६.१०॥
दीयतेच शिवज्ञानं क्षीयते पाशबन्धनं ।
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः ॥ ६.११॥
सादीक्षा त्रिविधा प्रोक्ता शिवागमविशारदैः ।
वेधारूपा क्रिया रूपमन्त्ररूपाचतापन ॥ ६.१२॥
गुरोरालोक मात्रेण हस्तमस्तकयोगतः ।
यः शिवत्व समावेशो वेधादीक्षेति सामता ॥ ६.१३॥
मान्त्रीदीक्षेतिसाप्रोक्ता मन्त्रमात्रोपदेशिनी ।
कुण्डमण्डलिकोपेता क्रियादीक्षा क्रियोत्तरा ॥ ६.१४॥
शुभमासे शुभतिथौशुभकाले शुभेहनि ।
विभूतिं शिवभक्तेभ्यो दत्त्वा ताम्बूल पूर्वकं ॥ ६.१५॥
यथाविधि यथायोगं शिष्यमानीय देशिकः ।
स्नातं शुक्लाम्बरधरं दन्तधावनपूर्वकं ॥ ६.१६॥
मण्डलेस्थापयेच्छिष्यं प्राङ्मुखं तमुदङ्मुखः ।
शिवस्यनाम सङ्कीर्तिं चिन्तामपि च कारयेत् ॥ ६.१७॥
विभूति पट्टं कृत्वान् ग्रेयथास्थानं यथाविधि ।
पञ्चब्रह्ममयैस्तत्र स्थापितैः कलशोदकैः ।
आचार्य सममूर्त्विग्भि स्त्रीवारमभिषेचयत् ॥ ६.१८॥
अभिषिच्च गुरुः शिष्य मासीनं पुरतः शुचिं ।
ततः पञ्चाक्षरीं शैवीं संसारभयतारिणीं ॥ ६.१९॥
तस्यदक्षिण कर्णेतु निगूढमपिकीर्तयेत् ।
छन्दोरूपमृषि चास्य देवतां न्यासपद्धतिं ॥ ६.२०॥

### ५. लिङ्गधारणस्थलं

स्फाटिकं शैलजं वापि चन्द्रकातमयं तुवा ।
बाणं वासूर्यकान्तम्वा लिङ्गमेकं समाहरेत् ॥ ६.२१॥
सर्वलक्षणसम्पन्ने तस्मिन् लिङ्गे विशोधिते ।
पीठस्थितेभिषिक्ते च गन्धपुष्पाधिपूजिते ॥ ६.२२॥
मन्त्रपूते कलां शैवीं योजयेद्विधिना गुरुः ।



From http://sanskritdocuments.org

शिष्यस्य प्राणमादाय लिङ्गे तत्र निधापयेत् ॥ ६.२३॥
तल्लिङ्गं तस्यतु प्राणे स्थापयेदेक भावतः ।
एवं कृत्वा गुरुर्लिङ्गं शिष्यहस्ते निधापयेत् ॥ ६.२४॥
प्राणवद्धारणीयं तत्प्राणलिङ्गमिदं तव ।
कदा चित्कुत्र चिद्वापि न वियोजय देहतः ॥ ६.२५॥
यदि प्रमदात्पतिते लिङ्गे देहन्महीतले ।
प्राणान् विमुञ्च सहसा प्राप्तयेमोक्ष सम्पदः ॥ ६.२६॥
इति सम्बोधितः शिष्यो गुरुणा शास्त्रवेदिना ।
धारयेच्छाङ्करं लिङ्गं शरीरे प्राण योगतः ॥ ६.२७॥
लिङ्गस्यधारणं पुण्यं सर्वपाप प्रणाशनं ।
अदृतं मुनिभिः सर्वै रागमार्थविशारदैः ॥ ६.२८॥
लिङ्गधारणमाख्यातं द्विधा सर्वार्थ साधकं ।
बाह्यमभ्यन्तरं चेति मुनिभिर्मोक्षकाङ्क्षिभिः ॥ ६.२९॥
चिद्रूपं परमं लिङ्गं शाङ्करं सर्वकारणं ।
यत्तस्यधारणं चित्ते तदान्तरमुदाहृतं ॥ ६.३०॥
चिद्रूपं हि परं तत्त्वं शिवाख्यं विश्वकारणं ।
निरस्त विश्व कालुष्यं निष्कलं निर्विकल्पकं ॥ ६.३१॥
सत्तानन्द परिस्फूर्ति समुल्ला स कलामयं ।
अप्रमेयमनिर्देश्यं मुमुक्षुभिरुपासितं ॥ ६.३२॥
परं ब्रह्म महालिङ्गं प्रपञ्चातीतमव्ययं ।
तदेव सर्वभूता नामन्त स्त्रि स्थानगोचरं ॥ ६.३३॥
मूलाधारेच हृदये भ्रूमध्ये सर्वदेहिनां ।
ज्योतिर्लिङ्गं सदाभातियद्ब्रह्मेत्याहुरागमाः ॥ ६.३४॥
अपरिच्छिन्नमव्यक्तं लिङ्गं ब्रह्म सनातनं ।
उपासानार्थमन्तस्थं परिच्छिन्नं स्वमायया ॥ ६.३५॥
लयं गच्छति यत्रैव जगदेतच्चराचरं ।
पुनः पुनः समुत्पत्तिं तल्लिङ्गं ब्रह्म शाश्वतं ॥ ६.३६॥
तस्माल्लिङ्गमिति ख्यातं सत्तानन्द चिदात्मकं ।
बृहत्वाद्बृम्हणत्वाच्च ब्रह्मशब्दाभिदेयकं ॥ ६.३७॥
आधारे हृदये वापि भ्रूमध्ये वा निरन्तरं ।
ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणं ॥ ६.३८॥
आधारे कनक प्रख्यं हृदये विद्रुमप्रभं ।
भ्रूमध्ये स्फटिकच्छायलिङ्गं योगी विभावयेत् ॥ ६.३९॥
निरपाधिकमाख्यातं लिङ्गस्यान्तर धारणं ।
विशिष्टं कोटिगुणितं बाह्यलिङ्गस्य धारणात् ॥ ६.४०॥
ये धारयन्ति हृदये लिङ्गं चिद्रूपमैश्वरं ।



From http://sanskritdocuments.org

न तेषां पुनरावृत्तिर्घोर संसारमण्डले ॥ ६.४१॥
अन्तर्लिङ्गानुसन्धानमात्म विद्यापरिश्रमः ।
गुरूपासनशक्तिश्च कारणं मोक्ष सम्पदां ॥ ६.४२॥
वैराग्य ज्ञानयुक्तानां योगिनां स्थिरचेतसां ।
अन्तर्लिङ्गानुसन्धाने रुचिर्बाह्ये नजायते ॥ ६.४३॥
ब्रह्म विष्णुश्च रुद्रश्च वासवाद्याश्च लोकपाः ।
मुनयः सिद्ध गन्धर्वा दानवा मानवास्तथा ॥ ६.४४॥
सर्वे सुज्ञानयोगेन सर्वकारण कारणं ।
पश्यन्ति हृदये लिङ्गं परमानन्दलक्षणं ॥ ६.४५॥
तस्मात्सर्व प्रयत्नेन शाङ्करं लिङ्गमुत्तमं ।
अन्तर्विभायेद्विद्वानशेषक्लेशमुक्तये ॥ ६.४६॥
अन्तर्धारयितं लिङ्गमशक्तः शक्त एव वा ।
बाह्याञ्चधारयेल्लिङ्गं तद्रूपमितिनिश्चयात् ॥ ६.४७॥
लिङ्गन्तु त्रिविधं प्रोक्तं स्थूलं सूक्ष्मम्परात्परं ।
इष्टलिङ्गमिदं स्थूल यद्बाह्येधार्यते तनौ ॥ ६.४८॥
प्राणलिङ्गमिदं सूक्ष्मं यदन्तर्भाव नामयं ।
परात्परं तु यत्प्रोक्तं तृप्तिलिङ्गं तदुच्यते ।
भावनातीतमव्यक्तं परब्रह्म शिवाभिदं ॥ ६.४९॥
इष्टलिङ्गमिदं साक्षादनिष्टपरिहारकं ।
धारयेदव धानेन शरीरेसर्वदा बुधः ॥ ६.५०॥
मूर्ध्निवा कण्ठ देशे वा कक्षे वक्षःस्थलेपि वा ।
कुक्षौ हस्तस्थले वापि धारयेल्लिङ्गमैश्वरं ॥ ६.५१॥
नाभेरधस्ताल्लिङ्गस्य धारणं पापकारणं ।
जटाग्रेत्रिकभागे च मलस्थाने न धारयेत् ॥ ६.५२॥
लिङ्गधारी सदा शुद्धो निजलिङ्गं मनोरमं ।
अर्चयेद्गन्ध पुष्पाद्यैः करपीठे समाहितः ॥ ६.५३॥
बाह्यपीठार्चनादेतत् करपीठार्चनं वरं ।
सर्वेषां वीरशैवानां मुमुक्षूणां निरन्तरं ॥ ६.५४॥
ब्रह्म विष्ण्वादयो देवा मुनयो गौतमादयः ।
धारयन्ति सदा लिङ्गमुत्तमाङ्गेविशेषतः ॥ ६.५५॥
लक्ष्म्यादिशक्तयः सर्वाः शिवभावविभाविताः ।
धारयन्त्यलिकाग्रेषु शिवलिङ्गमहर्निशं ॥ ६.५६॥
वेदशास्त्रपुराणेषुकामिकाद्यागमेषुच ।
लिङ्गधारणमाख्यातं वीरशैवस्य निश्चयात् ॥ ६.५७॥
ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते ।
तस्मात्पवित्रं तल्लिङ्गं धार्यं शैवमनामयं ॥ ६.५८॥



From http://sanskritdocuments.org

ब्रह्मेतिलिङ्गमाख्यातं ब्रह्मणः पतिरीश्वरः ।
पवित्रं तद्धि विख्यातं तत्सम्पर्कात्तनुःशुचिः ॥ ६.५९॥
अतप्ततनुरज्ञो वैह्यामः संस्कार वर्जितः ।
दीक्षाया रहितः साक्षान्नाप्नुयाल्लिङ्गमुत्तमं ॥ ६.६०॥
अघोरान् पापकाशीति या ते रुद्र शिवातनूः ।
यजुषा गीयते यस्मात्तस्माच्छैवोघवर्जितः ॥ ६.६१॥
योलिङ्गधारी नियतान्तरात्मा नित्यं शिवाराधनबद्धचित्तः ।
स धारयेत् सर्वमलापहत्यै भस्मामलं चारु यथा प्रयोगं ॥ ६.६२॥
इति श्री सिद्धान्त शिखामणौ भक्तस्थले गुरुकारण्यस्थल
लिङ्गधारणस्थल प्रसङ्गोनाम षष्ठ परिच्छेदः परिसमाप्तः ॥६॥

---

सप्तम परिच्छेदः

६. भस्मधारण स्थलं

भस्मधारण सण्युक्तः पवित्रो नियताशयः ।
शिवाभिधानं यत्प्रोक्तं भासनाद्भसितं तथा ॥ ७.१॥
महाभस्मेति सञ्चित्य महादेवरं प्रभामयं ।
वर्तन्तेये महाभागा मुख्यास्ते भस्मधारिणः ॥ ७.२॥
शिवाग्न्यादिसमुत्पन्नं मन्त्रन्यासादि योगतः ।
तत्सोपाधिकमित्याहुर्भस्म तन्त्र विशारदाः ॥ ७.३॥
विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः ।
एतानि पञ्चनामानि हेतुभिः पञ्चभिर्भृशं ॥ ७.४॥
विभूतिर्भूतिहेतुत्वाद्भसितं तत्त्वभासनात् ।
पापानां भर्तृ नाद्भस्म क्षारणात् क्षारमापदं ।
रक्षणात्सर्व भूतेभ्यो रक्षेति परिगीयते ॥ ७.५॥
नन्दा भद्रा च सुरभिः सुशीला सुमनास्तथा ।
पञ्चगावो विभोर्जाताः सद्योजातादिवक्त्रतः ॥ ७.६॥
कपिलः कृष्ण धवल दूम्ररक्तास्तथैव च ।
नन्दादीनां गवां वर्णाः क्रमेण परिकीर्तिताः ॥ ७.७॥
सद्योजाताद्विभूतिश्च वामाद्भसितमेव च ।
अघोराद्भस्म सञ्जातं क्षारं तत्पुरुषस्तथा ।
रक्षा चेशानववक्त्रश्च नन्दादि द्वारतोभवत् ॥ ७.८॥
धारयेन्नित्यकार्येषु विभूतिं च प्रयत्नतः ।
नैमित्तिकेषु भसितं क्षारं काम्येषु सर्वदा ॥ ७.९॥
प्रायश्चित्तेषु सर्वेषु भस्मनाम यथाविधि ।
रक्षाच मोक्ष कार्येषु प्रयोक्तव्या सदाबुधैः ॥ ७.१०॥



From http://sanskritdocuments.org

नन्दादीनन्तु ये वर्णाः कपिलाद्याः प्रकीर्तिताः ।
त एव वर्ण विख्याता भूत्यादीनां यथाक्रमं ॥ ७.११॥
भस्मोत्पादनमुद्दिष्टं चतुर्था तन्त्रवेदिभिः ।
कल्पं चैवानुकल्पं च ह्युपकल्पमकल्पकं ॥ ७.१२॥
एषामादिममुत्कृष्ट मन्यत्सर्व मभावतः ।
तथा शास्त्रोक्त विधिना गृहीत्व गोमयं नवं ॥ ७.१३॥
सद्येन वामदेवेन कुर्यात्पिण्डमनुत्तमं ।
शोषयेत्पुरुषेणैव दहेद्घोराच्छिवाग्निना ॥ ७.१४॥
कल्पं तद्भस्म विज्ञेयमनुकल्पमथोच्यते ।
पनेषु गोमयं यच्च शुष्कं चूर्णीकृतं तथा ॥ ७.१५॥
दग्थञ्चैवानुकल्पाख्य मापणादिगतं तु यत् ।
वस्त्रेणोत्तारितं भस्मगोमूत्राबद्ध पिण्डकं ॥ ७.१६॥
दग्दं प्रागुक्तविधिना भवेद्भस्मोपकल्पकं ।
अन्यैरापादितं भस्मह्यकल्पमिति कल्पितं ॥ ७.१७॥
एष्वेकतममादाय पात्रेषु कलशादिषु ।
त्रिसन्ध्यमाचरेत् स्नानं यथासम्भवमेववा ॥ ७.१८॥
स्नानकाले करौपादौ प्रक्षाल्य विमलाम्भसा ।
वामहस्त तलेभस्मक्षिप्त्वाच्छाद्यान्य पाणिना ॥ ७.१९॥
अष्टकृत्वोथमूलेन मौनी भस्माभि मन्त्र्यच ।
शिर ईशानमन्त्रेण वामदेवेन गुह्यकं ॥ ७.२०॥
पादौसद्येन सर्वाङ्गं प्रणवेनैव सेचयेत् ॥ ७.२१॥
भस्मना विहितं स्नानमिदमाग्नेय मुत्तमं ।
स्नानेषु वारुणाद्येषु मुख्यमेतन्मलापहं ॥ ७.२२॥
भस्मस्नानवतां पुंसां यथायोगं दिनेदिने ।
वारुणाद्यैरलं स्नानैर्बाह्यदोषापहारिभिः ॥ ७.२३॥
आग्नेयं भस्मना स्नानं यतिभिस्तु विधीयते ।
आर्द्रस्नानात्परं भस्म आर्द्रे जन्तुवधोध्रुवं ॥ ७.२४॥
आर्द्रन्तु प्रकृतिं विद्यात् प्रकृतिं बन्धनं विदुः ।
प्रकृतेस्तु प्रहाणार्धं भस्मना स्नानमिष्यते ॥ ७.२५॥
ब्रह्माद्या विबुधाः सर्वे मुनयो नारदादयः ।
योगिनः सनकाद्याश्च बाणाद्या दानवा अपि ॥ ७.२६॥
भस्मस्नानरताः सर्वे शिवभक्ति परायणाः ।
निर्मुक्त दोषकलिला नित्य शुद्धा भवन्ति हि ॥ ७.२७॥
नमःशिवायेति भस्म कृत्वा स्तपाभिमन्त्रितः ।
उद्धूलयेत्तेन देहं त्रिपुण्ड्रं चापि धारयेत् ॥ ७.२८॥
सर्वाङ्गोद्धूलनं चापि न समानं त्रिपुण्ड्रकैः ।


From http://sanskritdocuments.org

तस्मात्रिपुण्ड्रमेवैकं लिखेदुद्धूलनं विना ॥ ७.२९॥
त्रिपुण्ड्रं धारयेन्नित्यं भस्मना सजलेन हि ।
स्थानेषु पञ्चदशसु शरीरे साधकोत्तमः ॥ ७.३०॥
उत्तमाङ्गे ललाटेच श्रवणद्वितिये तथा ।
गले भुजद्वये चैव हृदि नाभौ च पृष्टके ॥ ७.३१॥
बाहुयुग्मेककुद्देशे मणिबन्धद्वये तथा ।
त्रिपुण्ड्रं भस्मनाधार्यं मूलमन्त्रेण साधकैः ॥ ७.३२॥
वामहस्ते तले भस्मक्षिप्त्वाच्छाद्यान्यपाणिना ।
अग्निरित्यादिमन्त्रेण स्पृशन् वाराभि मन्त्र्यच ॥ ७.३३॥
त्रिपुण्ड्रमुक्त स्थानेषु दध्यात् सजल भस्मना ।
शिवं शिवङ्करं शान्तं स प्राप्नोति न संशयः ॥ ७.३४॥
मध्याङ्गुलित्रयेणैव स्वदक्षिण करस्यतु ।
षडङ्गुलायुतं मानमपिवालिकमानकं ।
नेत्रयुग्मप्रमाणेन फाले दध्यात्त्रिपुण्ड्रकं ॥ ७.३५॥
मध्यमानामिकाङ्गुष्थैरनुलोमविलोमतः ।
धारयेद्य स्त्रिपुण्ड्राङ्कं स रुद्रो नात्र संशयः ॥ ७.३६॥
ऋजुश्वेतमनुव्याप्तं स्निग्धं श्रोत्र प्रमाणकं ।
एवं सल्लक्षणोपेतं त्रिपुण्ड्रं सर्व सिद्धिदं ॥ ७.३७॥
प्रातः कालेच मध्याह्ने सायाह्नेच त्रिपुण्ड्रकं ।
कदाचिद्भस्मना कुर्यात्सरुद्रो नात्र संशयः ॥ ७.३८॥
एवं विधं विभूत्या हि कुरुते यस्त्रिपुण्ड्रकं ।
स रौद्र धर्म सण्युक्त स्त्रयीमय इति श्रुतिः ॥ ७.३९॥
ब्रह्मा विष्णुश्च रुद्रश्च देवाः शुक्र पुरोगमाः ।
त्रिपुण्ड्रं धारयन्त्येव भस्मना परिकल्पितं ॥ ७.४०॥
वशिष्ठाद्या महाभागा मुनयः श्रुतिकोविदाः ।
धारयन्ति सदाकालं त्रिपुण्ड्रं भस्मना कृतं ॥ ७.४१॥
शिवागमेषु वेदेषु पुराणेष्वखिलेषु च ।
स्मृतीतिहासकल्पेषु विहितं भस्मपुण्ड्रकं ।
धारणीयं समस्तानां शैवानां च विशेषतः ॥ ७.४२॥
नास्तिको भिन्न मर्यादो दुराचारो परायणः ।
भस्मत्रिपुण्ड्रधारी चेन्मुच्यते सर्वकिल्बिषैः ॥ ७.४३॥

### ७. रुद्राक्षधारण स्थलं

भस्मना विहितस्नान स्त्रिपुण्ड्राङ्कितमस्तकः ।
शिवार्चन परो नित्यं रुद्राक्षमपि धारयेत् ॥ ७.४४॥
रुद्राक्ष धारणादेव मुच्यन्ते सर्व पातकैः ।
दुष्टचित्ता दुराचारा दुष्प्रज्ञा अपि मानवाः ॥ ७.४५॥


From http://sanskritdocuments.org

पुरात्रिपुरसम्हारे त्रिनेत्रो जगतां पतिः ।
उदपश्यत्पुरां योगमुन्मीलित विलोचनः ॥ ७.४६॥
निपेतुस्तस्य नेत्रेभ्यो बहवो जलबिन्दवः ।
तेभ्योजाताहिरुद्राक्षा रुद्राक्षा इति कीर्तिताः ॥ ७.४७॥
रुद्रनेत्र समुत्पन्ना रुद्राक्षा लोकपावनाः ।
अष्टत्रिंशत्प्रभेदेन भवन्त्युत्पत्ति भेदतः ॥ ७.४८॥
नेत्रात् सूर्यत्मनः शम्भोः कपिला द्वादशोदिताः ।
श्वेताः षोडश सञ्जाताः सोमरूपद्विलोचनात् ॥ ७.४९॥
कृष्णा दश विधा जाता वह्निरूपाद्विलोचनात् ।
एवमुत्पत्ति भेदेन रुद्राक्षा बहुधा स्मृताः ॥ ७.५०॥
अच्छिद्रं कनकप्रख्यमनन्यधृतमुत्तमं ।
रुद्राक्षं धारयेत् प्राज्ञः शिवपूजापरायणः ॥ ७.५१॥
यथास्थानं यथावक्त्रं यथायोगं यथाविधि ।
रुद्राक्षधारणं वक्ष्ये रुद्र सायुज्य सिद्धये ॥ ७.५२॥
शिखायामेक मेकान्यं रुद्राक्षं धारयेद्बुधः ।
द्वित्रिद्वादश वक्त्राणि शिरसि त्रीणी धारयेत् ॥ ७.५३॥
षट् त्रिंशद्धारयेन्मूर्ध्नि नित्यमेकादशाननान् ।
दशसप्त पञ्चवक्त्रान् षट् षट् कर्णद्वयेव हेत् ॥ ७.५४॥
षडष्टवदनान् कण्ठे द्वात्रिंशद्धारयेत्सदा ।
पञ्चाशद्धारयेद्धीमान् चतुर्वक्त्राणि वक्षसि ॥ ७.५५॥
त्रयोदशमुखान् बाह्वोर्धरेत् षोडश षोडश ।
प्रत्येकं द्वादश वह्नेन वास्यान्मणि बन्धयोः ॥ ७.५६॥
चतुर्दशमुखं यज्ञसूत्रमष्टोत्तरं शतं ।
धारयेत् सर्वकालं तु रुद्राक्षं शिवपूजकः ॥ ७.५७॥
एवं रुद्राक्षधारी यः सर्वकालेतु वर्तते ।
तस्य पापकथा नास्ति मूढस्यासि न संशयः ॥ ७.५८॥
ब्रह्महामद्यपायी च स्वर्णहृद्गुरुतल्पगः ।
मातृहा पितृहा चैव ब्रूणहाकृत घातकः ।
रुद्राक्ष धारणा देव मुच्यन्ते सर्वपातकैः ॥ ७.५९॥
दर्शनात् स्पर्शनाच्चैव स्मरणादपि पूजनात् ।
रुद्राक्ष धारणाल्लोके मुच्यन्तेपातकैर्जनाः ॥ ७.६०॥
ब्राह्मणो वान्त्यजोवापि मूर्खोवापण्डितोपिवा ।
रुद्राक्ष धारणादेव मुच्यते सर्वपातकैः ॥ ७.६१॥
गवां कोटि प्रदानस्य यत्फलं भुविलभ्यते ।
तत्फलं लभते मर्त्यो नित्यं रुद्राक्ष धारणात् ॥ ७.६२॥
मृतिकालेतु रुद्राक्षं निष्पीड्य सहवारिणा ।


From http://sanskritdocuments.org

यः  पिभेच्छिन्तयन् रुद्रं रुद्रलोकं सगच्छति ॥ ७.६३॥
भस्मोद्धूलित सर्वाङ्गा धृतरुद्राक्ष मालिकाः ।
ये भवन्ति महात्मानोरुद्रस्ते नात्र संशयः ॥ ७.६४॥
नित्यानि काम्यानि निमित्त जानि कर्माणी सर्वाणि सदापि कुर्वन् ।
स भस्मरुद्राक्षधरो यदिस्यात् द्विजो नतस्यास्ति फलोपपत्तिः ॥ ७.६५॥
सर्वेषु वर्णाश्रम सङ्गतेषु नित्यं सदाचार परायणेषु ।
श्रुतिस्मृतिभ्यामिह चोद्यमानो विभूति रुद्राक्षधरः समानः ॥ ७.६६॥
इति श्री सिद्धान्त शिखामणौ भक्तस्थले भस्मरुद्राक्ष धारण स्थल
प्रसङ्गोनाम सप्तम परिच्छेदः परिसमाप्तः ॥७॥

---

अष्टम परिच्छेदः

८. पञ्चाक्षर जपस्थलं

धृतश्रीभूति रुद्राक्षः प्रयतो लिङ्गधारकः ।
जपेत्पञ्चाक्षरी विद्यां शिवतत्त्वप्रबोधिनीं ॥ ८.१॥
शिवतत्त्वात्परन्नास्ति यथातत्त्वान्तरं महत् ।
तथापञ्चाक्षरीमन्त्रन्नास्ति मन्त्रान्तरं महत् ॥ ८.२॥
ज्ञाते पञ्चाक्षरी मन्त्रे किं वा मन्त्रान्तरैः फलं ।
ज्ञाते शिवे जगन्मूले किं फलं देवतान्तरैः ॥ ८.३॥
सप्तकोटीषु मन्त्रेषु मन्त्रः पञ्चाक्षरो महन् ।
ब्रह्म विष्णवादि देवेषु यथा शम्भुर्महत्तरः ॥ ८.४॥
अशेष जगतां हेतुः परमात्मा महेश्वरः ।
तस्य वाचक मन्त्रोयं सर्व मन्त्रैक कारणं ॥ ८.५॥
तस्याभिदानमन्त्रोयमभिधेयश्च स स्मृतः ।
अभिदा नाभिदे यत्वान्मन्त्रात् सिद्धः परश्शिवः ॥ ८.६॥
नमश्शब्दं वदेत्पूर्वं शिवायेति ततः परं ।
मन्त्रः पञ्चाक्षरो ह्येष सर्वश्रुति शिरोगतः ॥ ८.७॥
अदितः परिश्शुद्धत्वान्मलत्रय वियोगतः ।
शिव इत्युच्यते शम्भुश्चिदानन्दघनः प्रभुः ॥ ८.८॥
अस्पदत्वाद शेषाणां मङ्गलानां विशेषतः ।
शीवशब्दाभिधेयो हि देवदेव स्त्रियम्बकः ॥ ८.९॥
शिव इत्यक्षरद्वन्द्वं परब्रह्म प्रकाशकं ।
मुख्यवृत्यातदन्येषां शब्दानाङ्गौणवृत्तयः ॥ ८.१०॥
तस्मान्मुख्यतरं नाम शिव इत्यक्षरद्वयं ।
सच्चिदानन्द रूपस्य शम्भोरमित तेजसः ॥ ८.११॥
एतन्ना मावलम्बेन मन्त्रः पञ्चाक्षरः स्मृतः ।


From http://sanskritdocuments.org

यस्मादतः सदा जप्योमोक्षकाङ्क्षिभिरादरात् ॥ ८.१२॥
यथान नादिर्महादेवः सिद्धः संसारमोचकः ।
तथा पञ्चाक्षरो मन्त्रः संसारक्षयकारकः ॥ ८.१३॥
पञ्चभूतानि सर्वाणि पञ्चतन्मात्रकाणि च ।
ज्ञानेन्द्रियाणि पञ्चापि पञ्चकर्मेन्द्रियाणिच ॥ ८.१४॥
पञ्च ब्रह्माणि पञ्चापि कृत्यानि सहकारणैः ।
बोध्यानि पञ्चभिर्वर्णैः पञ्चाक्षर महामनोः ॥ ८.१५॥
पञ्चधा पञ्चधा यानि प्रसिद्धानि विशेषतः ।
तानि सर्वाणि वस्तूनि पञ्चाक्षरमयानि हि ॥ ८.१६॥
ओङ्कारपूर्वो मन्त्रोयं पञ्चाक्षरमयःपरः ।
शैवागमेषु वेदेषु षडक्षर इति स्मृतः ॥ ८.१७॥
मन्त्रस्यास्यादि भूतेन प्रणवेन महामनोः ।
प्रबोध्यते महादेवः केवलश्चित्सुखात्मकः ॥ ८.१८॥
प्रणवेनैकवर्णेन परब्रह्म प्रकाश्यते ।
अद्वितीयं परानन्दं शिवाख्यं निष्प्रपञ्चकं ॥ ८.१९॥
परमात्म मनुर् ज्ञेयः सोहं रूपः सनातनः ।
जायते सहयोर्लोपादोमित्येकाक्षरो मनुः ॥ ८.२०॥
प्रणवेनैव मन्त्रेण बोध्यते निष्कलः शिवः ।
पञ्चाक्षरेण मन्त्रेण पञ्चब्रह्मतनुस्तथा ॥ ८.२१॥
निष्कलः सम्विदाकारः सकलो विश्वमूर्ति कः ।
उभयात्मा शिवो मन्त्रे षडक्षरमयेस्थितः ॥ ८.२२॥
मूलं विद्या शिवः शैवसूत्रं पञ्चाक्षर स्तथा ।
एतानि नामधेयानि कीर्तितानि महामनोः ॥ ८.२३॥
पञ्चाक्षरीमिमां विद्यां प्रणवेन षडक्षरीं ।
जपेत् समाहितोभूत्वा शिवपूजपरायणः ॥ ८.२४॥
प्राणायमत्रयं कृत्वा प्राङ्मुखोदङ्मुखोन पिवा ।
चिन्तयन् हृदयाम्भोजे देवदेवं त्रिलोचनं ॥ ८.२५॥
सर्वालङ्कारं सण्युक्तं साम्बं चन्द्रार्थशेखरं ।
जपेदेतं महाविद्यां शिवरूपामनन्यधीः ।
जपस्तु त्रिविधः प्रोक्तो वाचिकोपांशुमानसः ॥ ८.२६॥
श्रूयते यस्तु पार्श्वस्थैर्यथावर्ण समन्वयः ।
वाचिकः सतु विज्ञेयः सर्वपाप प्रभञ्जनः ॥ ८.२७॥
ईषत् सृष्ट्वाधर पुटं यो मन्दमभिधीयते ।
पार्श्वस्थैर श्रुतः सोन् यमुम्पांशुः परिकीर्तितः ॥ ८.२८॥
अस्पृष्य्याधरमस्सन्दि जिह्वाग्रण्योंतरात्मना ।
भाव्यते वर्णरूपेण स मानस इति स्मृतः ॥ ८.२९॥


From http://sanskritdocuments.org

यावन्तः कर्मयज्ञाद्या प्रवदानतपांसिच ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीं ॥ ८.३०॥
माहत्म्यं वाचिक स्यैतज्जपयज्ञस्य कीर्तितं ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥ ८.३१॥
वाचिकात्तदुपांशोश्च जपादस्य महामनोः ।
मानसा हि जपः श्रेष्ठो घोर संसार नाशकः ॥ ८.३२॥
एतेष्वेकेन विधिना यथाभावं यथाक्रमं ।
जपेत्पञ्चाक्षरीमेतां विद्यां पाशविमुक्तये ॥ ८.३३॥
अनेन मूलमन्त्रेण शिवलिङ्गं प्रपूजयेत् ।
नित्यं नियमसम्पन्नः प्रयतात्मा शिवात्मकः ॥ ८.३४॥
भक्त्या पञ्चाक्षरेणैव यः शिवं सकृदर्चयेत् ।
सोपि गच्छेच्छिवस्थां मन्त्रस्यास्यैव गौरवात् ॥ ८.३५॥
अब्भक्षा वायुभक्षाश्चये चान्ये व्रतकर्शिताः ।
तेषामेतैर्व तैर्नास्ति शिवलोक समागमः ॥ ८.३६॥
तस्मात्तपांसि यज्ञाश्च व्रतानि नियमास्तथा ।
पञ्चाक्षरार्चन स्यैते कोट्यं शेनापिनो समाः ॥ ८.३७॥
अशुद्धो वा विशुद्धोवा सकृत्पञ्चाक्षरेण यः ।
पूजयेत्पतितोवापि मुच्यते नात्र संशयः ॥ ८.३८॥
सकृदुच्चरमात्रेण पञ्चाक्षर महामनोः ।
सर्वेषामपि जन्तूनां सर्वपापक्षयो भवेत् ॥ ८.३९॥
अन्येपि बहवो मन्त्रा विद्यन्ते सकलागमे ।
भूयो भूयः समभ्यासात् पुरुषार्थ प्रदायिनः ॥ ८.४०॥
एषमन्त्रो महाशक्तिरीश्वरप्रतिपादकः ।
सकृदुच्चारणा देव सर्वसिद्धि प्रदायकः ॥ ८.४१॥
पञ्चाक्षरीं समुच्छार्य पुष्पं लिङ्गे विनिक्षिपेत् ।
यस्तस्य वाजपेयानां सहस्रफलमिष्यते ॥ ८.४२॥
अग्निहोत्रं त्रयो वेदयज्ञाश्च बहुदक्षिणाः ।
पञ्चाक्षरजपस्यैते कोट्यं शेनापि नो नमाः ॥ ८.४३॥
पुरा सानन्द योगीन्द्रः शिवज्ञान परायणः ।
पञ्चाक्षरं समुच्छार्य नारकानुदतारयत् ॥ ८.४४॥
सिद्ध्या पञ्चाक्षरस्यास्य शतानन्दः पुरामुनिः ।
नरकं स्वर्गमकरोत् सङ्गीरस्यापि पापिनः ॥ ८.४५॥
उपमन्युः पुरा योगी मन्त्रेणा नेन सिद्धिमान् ।
लब्धवान् परमेशानाच्छैवशास्त्र प्रवक्तृतां ॥ ८.४६॥
वशिष्ठ वामदेवाद्या मुनयो मुक्त किल्बिषाः ।
मन्त्रेण नेन संसिद्धा महातेजस्विनोन भवन् ॥ ८.४७॥


From http://sanskritdocuments.org

ब्रह्मादीनां च देवानं जगत्सृष्ट्यादिकर्मणि ।
मन्त्रस्यास्यैवमाहत्म्यात् सामर्थ्य मुपजायते ॥ ८.४८ ॥
किमिह बहुभिरुक्तैर्मन्त्रमेनं महात्मा ।
प्रणव सहितमादौ यस्तु पञ्चाक्षराख्यं ।
जपति परमभक्त्या पूजयन् देवदेवं ।
सगतदुरितबन्धो मोक्षलक्ष्मीं प्रयाति ॥ ८.४९ ॥
इति श्री सिद्धान्त शिखामणौ भक्तस्थले पञ्चाक्षर
जपस्थल प्रसङ्गोनाम अष्टम परिच्छेदः परिसमाप्तः ॥८ ॥

---

नवम परिच्छेदः

९. भक्तमार्गक्रियास्थलं

भूतिरुद्राक्ष सण्युक्तो लिङ्गधारी सदा शुचिः ।
पञ्चाक्षर जपोद्योगी शिवभक्त इति स्मृतः ॥ ९.१॥
श्रवणं कीर्तनं शम्भोः स्मरणं पादसेवनं ।
अर्चनं वन्दनं दास्यं सख्यमात्म निवेदनं ॥ ९.२॥
एवं नव विधा भक्तिः प्रोक्ता देवेन शम्भुना ।
दुर्लभा पापिनां लोके सुलभा पुण्यकर्मणां ॥ ९.३॥
अधमे चोत्तमे वापि यत्र कुत्र चि दूर्जिता ।
वर्तते शाङ्करी भक्तिः स भक्त इति गीयते ॥ ९.४॥
भक्तिः स्थिरीकृता यस्मिन् म्लेच्छेवाद्विजसत्त मे ।
शम्भोः प्रियः न विप्रश्च न प्रियो भक्ति वर्जितः ॥ ९.५॥
सा भक्तिर्द्विविधा ज्ञेया बाह्याभ्यन्तर भेदतः ।
बाह्या स्थूलान्तरा सूक्ष्मा वीरमाहेश्वरादृता ॥ ९.६॥
सिम्हासने शुद्धदेशे सुरम्ये रत्न चित्रिते ।
शिवलिङ्गस्य पूजा या सा बाह्या भक्ति रुच्यते ॥ ९.७॥
लिङ्गे प्राणं समाधाय प्राणे लिङ्गन्तु शाम्भवं ।
स्वस्थं मनस्तथा कृत्या न किञ्चिच्चिन्तयेद्यदि ॥ ९.८॥
साभ्यन्तरा भक्तिरिति प्रोच्यते शिवयोगिभिः ।
सा यस्मिन् वर्तते तस्य जीवनं भ्रष्टबीजवत् ॥ ९.९॥
बहुनात्रकिमुक्तेन गुह्याद्गुह्यतरा परा ।
शिवभक्तिर्नसन्देहस्तया युक्तो विमुच्यते ॥ ९.१०॥
प्रसादादेवा सा भक्तिः प्रसादो भक्ति सम्भवः ।
यथैवाङ्कुरतो बीजं बीजतोवा यथाङ्कुरः ॥ ९.११॥
प्रसाद पूर्विका येयं भक्तिर्मुक्ति विधायिनी ।
नैव सा शक्यते प्राप्तुं नरैरेकेन जन्मना ॥ ९.१२॥



From http://sanskritdocuments.org

अनेक जन्म शुद्धानां श्रौतस्मार्तानुवर्तिनां ।
विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः ॥ १.१३ ॥
प्रसन्ने सतिमुक्तः स्यान्मुक्तःशिव समोभवेत् ।
अल्पभावोपि यो मर्तस्य स्य जन्म त्रयात्परं ।
न योनि यन्त्रपीडा वैभवेन्नैवात्र संशयः ॥ १.१४ ॥
साङ्गान्यूना च या सेवा सा भक्तिरिति कथ्यते ।
सा पुनर्भिद्यते त्रेथा मनोवाक्काय साधनैः ॥ १.१५ ॥
शिवरूपादिचिन्ता या सा सेवा मानसि स्मृता ।
जपादिर्वाचिकी सेवा कर्म पूजा च कायिकी ॥ १.१६ ॥
बाह्यमाभ्यन्तरं चैव बाह्याम्भ्यन्तरमेव वा ।
मनोवाक्काय भेदैश्च त्रिधा तद्भजनं विदुः ॥ १.१७ ॥
अन्यात्मा विदितं बाह्यं शम्भोरभ्यर्चनादिकं ।
तदेवतु स्वसम्वेद्य माभ्यन्तरमुदाहृतं ।
मनो महेश प्रवणं बाह्याभ्यन्तरमुच्यते ॥ १.१८ ॥
मनोमहेश ध्यानाढ्यं नान्यध्यानरतं मनः ।
शिवनामरता वाणी वाङ्मता चैव नेतरा ॥ १.१९ ॥
लिङ्गैः शिवस्य चोद्दिष्टैस्त्रिपुण्ड्रादिभिरङ्कितः ।
शिवोपचार निरतः कायः कायो न चेतरं ॥ १.२० ॥
पञ्चधा कथयते सद्भिस्त देव भजनं पुनः ।
तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वकं ॥ १.२१ ॥
शिवार्थे देह संशोषस्तपः कृच्छ्रादिनो मतं ।
शिवार्चा कर्म विज्ञेयम्बाह्यं या गादिनोच्यते ॥ १.२२ ॥
जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव वा ।
रुद्राध्यायादिकाभ्यासो नवेदाध्ययनादिकं ॥ १.२३ ॥
ध्यानं शिवस्य रूपादिचिन्ता नात्मादि चिन्तनं ।
शिवागमार्थ विज्ञानं ज्ञानं नान्यार्थ वेदनं ।
इति पञ्चप्रकारोयं शिवयज्ञः प्रकीर्तितः ॥ १.२४ ॥
अनेन पञ्चयज्ञेन यः पूजायति शङ्करं ।
भक्त्या परमया युक्तः स वै भक्त इतिस्मृतः ॥ १.२५ ॥
पूजनाच्छिवभक्त स्य पुण्यागतिरवाप्यते ।
अवमानान्महाघोरो नरको नात्र संशयः ॥ १.२६ ॥
शिवभक्तो महातेजाः शिवभक्ति पराङ्मुखान् ।
नस्पृशेन्नैव वीक्षेत नतैः सहवसेत् क्वचित् ॥ १.२७ ॥
यदा दीक्षप्रवेशः स्याल्लिङ्ग धारण पूर्वकं ।
तदा प्रभृति भक्तोन् सौ पूजयेत् स्वागमस्थिता ॥ १.२८ ॥
स्वमार्गाचारनिरताः स्वजातीया द्विजास्तु ये ।


From http://sanskritdocuments.org

तेषां गृहेषु भुञ्जीत नेतरेषां कदाचन ॥ ९.२९॥
स्वमार्गाचार विमुखैर्भविभिः प्राकृतात्मभिः ।
प्रेषितं सकलं द्रव्यमात्मलीनमपि त्यजेत् ॥ ९.३०॥
नार्चयेदन्य देवांस्तुन स्मरेन्न च कीर्तयेत् ।
न तन्नै वेद्यमश्नी याच्छिवभक्तो दृढव्रतः ॥ ९.३१॥
यद्गृहेष्वन्यदेवोस्ति तद्गृहिणि परित्यजेत् ।
नान्यदेवार्चकान्मर्त्यापूजाकाले निरीक्षयेत् ॥ ९.३२॥
सदा शिवै कनिष्ठानाम्वीर शैवाध्ववर्तिनां ।
नहि स्थावर लिङ्गानां निर्माल्याद्युपभज्यते ॥ ९.३३॥
यत्र स्थावरलिङ्गानामपायः परिवर्तते ।
अथवा शिवभक्तानां शिवलाण्छन धारिणां ॥ ९.३४॥
तत्र प्राणान् विहायापि परिहारं समाचरेत् ।
शिवार्थं मुक्त जीवश्चेच्छिवसायुज्यमाप्नुयात् ॥ ९.३५॥
यत्र चाचार निदास्ति कदाचित्त त्रन व्रजेत् ।
यद्गृहे शिवनिन्दास्ति तद्गृहं तु परित्यजेत् ॥ ९.३६॥
यः सर्वभूताधिपतिं विश्वेशानं विनिन्दति ।
न तस्यनिष्कृतिः शक्याकर्तुं वर्षशतैरपि ॥ ९.३७॥
शिवनिन्दाकरं दृष्ट्वाघातयेदथवा शपेत् ।
स्थानं वा तत्परित्यज्य गच्छेद्य द्यक्षमो भवेत् ॥ ९.३८॥
शिवपूजापरोभूत्वा पूर्वकर्मविवर्जयेत् ।
अथवा पूर्वकर्मस्यात् सापूजानिष्फला भवेत् ॥ ९.३९॥
उत्तमां वृत्तिमाश्रित्व्य नीचां वृत्तिं समाश्रितः ।
आरूढपतितो ज्ञेयः सर्वकर्म बहिष्कृतः ॥ ९.४०॥
पञ्चाक्षरोपदेशि यो नरस्तुतिकरो यदि ।
सोलिङ्गी स दुराचारी कुकविः स तु विश्रुतः ॥ ९.४१॥
चर्मपात्रे जलं तैलं न ग्राह्यं भक्ति तत्परैः ।
गृह्यते यदि भक्तेन रौरवं नरकं व्रजेत् ॥ ९.४२॥
न तस्य सूतकं किञ्चित् प्राणलिङ्गाङ्ग सङ्गिनः ।
जननोत्थम्मृतोत्थं च विद्यते परमार्थतः ॥ ९.४३॥
लिङ्गार्चनरता याश्च ऋतौ नार्यान सूतकं ।
तथा प्रसूतिकाश्च सूतकं नैव विद्यते ॥ ९.४४॥
गृहे यस्मिन् प्रसूता स्त्री सूतकं नात्र विद्यते ।
शिवपादाम्बुसंस्पर्शात् सर्वपापं विनश्यति ॥ ९.४५॥
शिवस्थानानि तीर्थानि विशिष्टानि शिवार्चकः ।
शिवयात्रोत्सवे नित्यं सेवेत परया मुदा ॥ ९.४६॥
शिवक्षेत्रोत्सवमहायात्रा दर्शन काङ्क्षिणां ।



From http://sanskritdocuments.org

मार्गेन्नपानदानं च कुर्यान्माहेश्वरो जनः ॥ ९.४७॥
नान्नतो यसमन्दानं न चामिंसा परं तपः ।
तस्मान्माहेश्वरो नित्यमन्नतोय प्रदोभवेत् ॥ ९.४८॥
स्वमार्गाचारवर्तिभ्यः स्वजातिभ्यः सदाव्रती ।
दद्यात्तेभ्यः समादद्यात् कन्याङ्कुल समुद्भवां ॥ ९.४९॥

१०. उभयस्थलं

एवमाचार सण्युक्तो वीरशैवो महाव्रती ।
पूजयेत्परया भक्त्या गुरुं लिङ्गं च सन्ततं ॥ ९.५०॥
गुरोरभ्यर्च नेनापि साक्षादभ्यर्चितः शिवः ।
नास्ति भेदस्तयोः कश्चिदेकत्वात्तत्त्वरूपतः ॥ ९.५१॥
यथा देवे जगन्नाथे सर्वानुग्रहकारके ।
तथा गुरुवरे कुर्यादुपचारान् दिने दिने ॥ ९.५२॥
अप्रत्यक्षो महादेवः सर्वेषामात्ममायया ।
प्रत्यक्षोगुरुरूपेण वर्तते भक्ति सिद्धये ॥ ९.५३॥
शिवज्ञानं महाघोर संसारार्णवतारकं ।
दीयते येव न गुरुः कन्यवन्द्योन जायते ॥ ९.५४॥
यत्कटाक्ष कलामात्रात् परमानन्द लक्षणं ।
लभ्यते शिवरूपत्वं स गुरुः केन नार्च्यते ॥ ९.५५॥
हितमेव चरेन्नित्यं शरीरेण धनेन च ।
आचार्य स्योपशान्तस्य शिवज्ञानमहानिधेः ॥ ९.५६॥
गुरोराज्ञां न लङ्घेत सिद्धिकामो महामतिः ।
तदाज्ञानलङ्घनेनापि शिवाज्ञाच्छेदको भवेत् ॥ ९.५७॥

११. त्रिविधसम्पत्तिस्थलं

यथा गुरौ यथालिङ्गे भक्तिमान् परिवर्तते ।
जङ्गमे च तथा नित्यं भक्तिं कुर्याद्विचक्षणः ॥ ९.५८॥
एक एव शिवः साक्षात्सर्वानुग्रहकारकः ।
गुरुजङ्गमलिङ्गात्मा वर्तते भुक्ति मुक्तिदः ॥ ९.५९॥
लिङ्गञ्च द्विविधं प्रोक्तं जङ्गमाजङ्गमात्मना ।
अजङ्गमे यथा भक्ति र्जङ्गमे च तथा स्मृता ॥ ९.६०॥
अजङ्गमं तु यल्लिङ्गं मृच्छिलादि विनिर्मितं ।
तद्वरं जङ्गमं लिङ्गं शिवयोगीति विश्रुतं ॥ ९.६१॥
आचरे मन्त्र संस्काराल्लिङ्गे वसति शङ्करः ।
सदाकालं वसत्येन चरलिङ्गे महेश्वरः ॥ ९.६२॥
शिवयोगिनि यद्दत्तं तदक्षयफलं भवेत् ।
तस्मात्सर्व प्रयत्नेन तस्मै देयं महात्मने ॥ ९.६३॥
यत्फलं लभते जन्तः पूजया शिवयोगिनः ।



From http://sanskritdocuments.org

तदक्षयमिति प्रोक्तं सकलागमपारगैः ॥ ९.६४॥
नावमन्येत कुत्रापि शिवयोगिन मागतं ।
अवमानाद्भवेत्त स्य दुर्गतिश्च न संशयः ॥ ९.६५॥
शिवयोगी शिवः साक्षादिति कैङ्कर्य भक्तितः ।
पूजये दादरणैव यथालिङ्गं यथा गुरुं ॥ ९.६६॥

१२. प्रसाद स्वीकार स्थलं

पादोदकं यथा भक्त्या स्वीकरोति महेशितुः ।
तथा शिवात्मनोर्नित्यं गुरुजङ्गम योरपि ॥ ९.६७॥
सर्व मङ्गल माङ्गल्यं सर्व पावन पावनं ।
सर्व सिद्धिकरं पुंसां शम्भोः पादाम्बु धारणं ॥ ९.६८॥
शिरसा धारयेद्यस्तु पत्रं पुष्पं शिवार्पितं ।
प्रतिक्षणं भवेत्तस्य पौण्डरीक क्रिया फलं ॥ ९.६९॥
भुञ्जीत रुद्र भुक्तान्नं रुद्रपीत जलं पिबेत् ।
रुद्राघ्रातं सदा जिघ्रे दिति जाबालिकी श्रुतिः ॥ ९.७०॥
अर्पयित्वा निजे लिङ्गे पत्रं पुष्पं फलञ्जलं ।
अन्नाद्यं सर्वभोज्यं च स्वीकुर्याद्भक्ति मान्नरः ॥ ९.७१॥
गुरुत्वात्सर्वलोकानां शम्भोरमित तेजसः ।
तस्मै निवेदितं सर्वं स्वीकार्यं तत्परायणैः ॥ ९.७२॥
ये लिङ्गधारिणोलोके ये शिवैक परायणाः ।
तेषां तु शिव निर्माल्यमुचितं नान्यजन्तुषु ॥ ९.७३॥
अन्न जाते तु भक्तेन भुज्यमाने शिवार्पिते ।
सिक्थे सिक्थेश्वमेधस्य यत्फलं तदवाप्यते ॥ ९.७४॥
निर्माल्यं निर्मलं शुद्धं शिवेन स्वीकृतं यतः ।
निर्मलैस्तत्परैर्धार्यं नान्यैः प्राकृतजन्तुभिः ॥ ९.७५॥
शिवभक्ति विहीनानां जन्तूनां पापक्मणां ।
विशुद्धे शिवनिर्माल्ये नाधिकारोस्ति कुत्रचित् ॥ ९.७६॥
शिवलिङ्गं प्रसादस्य स्वीकाराद्यत्फलं भवेत् ।
तथा प्रसाद स्वीकारद्गुरु जङ्गमयोरपि ॥ ९.७७॥
तस्माद्गुरुं महादेवं शिवयोगिन मेव च ।
पूजयेत्तत्प्रसादान्नं भुञ्जीत प्रतिवासरं ॥ ९.७८॥

१३. सोपाधिदानस्थलं

शिवलिङ्गे शिवाचार्ये शिवयोगिनि भक्तिमान् ।
दानं कुर्याद्यथाशक्ति तत्प्रसादयुतः सदा ॥ ९.७९॥
दानं तु त्रिविधं प्रोक्तं सोपाधि निरुपाधिकं ।
सहजं चेति तन्त्रेषु सर्व तन्त्र विशारदैः ॥ ९.८०॥
फलाभिसन्धि सण्युक्तं दानं तद्विहितं भवेत् ।


From http://sanskritdocuments.org

तत्सोपाधिक माख्यातं मुमुक्षुभिरनादृतं ॥ ९.८१॥

१४. निरुपाधिक दान स्थलं

फलाभि सन्धिनिर्मुक्तमीश्वरार्पित काङ्क्षितं ।
निरुपाधिकमाख्यातं दानं दान विशारदैः ॥ ९.८२॥

१५. सहजदानस्थलं

अदातृदातृ देयानां शिवभावं विचिन्त्यहि ।
आत्मनोकर्तृभावं च यद्दत्तं सहजन्तुतत् ॥ ९.८३॥
सहजं दानमुत्कृष्टं सर्वदानोत्तमोत्तमं ।
शिवज्ञानप्रदं पुंसां जन्मरोग निवर्तकं ॥ ९.८४॥
शिवाय शिवभक्ताय दीयते यदि किञ्चन ।
भक्त्यातदपि विख्यातं सहजं दानमुत्तमं ॥ ९.८५॥
दानात् स्वर्ण सहस्रस्य सत्पात्रे यत्फलं भवेत् ।
एकपुष्प प्रदानेन शिवे तत्फलमिष्यते ॥ ९.८६॥
शिव एव परं पात्रं सर्वविद्यानिधिर्गुरुः ।
तस्मै दत्तन्तु यत्किञ्चि त्तदनन्तफलं भवेत् ॥ ९.८७॥
शिवयोगीः शिवः साक्षाच्छिवज्ञान महोदधिः ।
यत्किञ्चिद्दीयते तस्मै तद्दानं पारमार्थिकं ॥ ९.८८॥
शिवयोगी महापात्रं सर्वेषां दानकर्मणि ।
तस्मान्नास्ति परङ्किञ्चित्पात्रं शास्त्र विचारतः ॥ ९.८९॥
भिक्षामात्रप्रदानेन शान्ताय शिवयोगिने ।
यत्फलं लभ्यते नैतद्यज्ञकोटिशतैरपि ॥ ९.९०॥
शिवयोगिनि सन्तृप्ते तृप्तो भवति शङ्करः ।
तत्तृप्त्या तन्मयं विश्वं तृप्ति मेति चराचरं ॥ ९.९१॥
तस्मात्सर्वप्रयत्नेन येन केनापि कर्मणा ।
तृप्तिं कुर्यात्सदाकालमन्नाद्यैः शिवयोगिनः ॥ ९.९२॥
निरुपाधिक चिद्रूप परानन्दात्म वस्तुनि ।
समाप्तं सकलं यस्य स दानी शङ्करः स्वयं ॥ ९.९३॥
उक्ताखिलाचार परायणोसौ सदा वितन्वन् सहजं तु दानं ।
ब्रह्मादिसम्पत्सु विरक्त चित्तो भक्तोहि महेश्वर तामुपैति ॥ ९.९४॥
इति श्री सिद्धान्त शिखामणौ भक्तस्थले भक्तमार्गक्रियास्थलादि
सप्तविध स्थल प्रसङ्गोनाम नवम परिच्छेदः परिसमाप्तः ॥९॥

---

दशम परिच्छेदः माहेश्वरस्थलं

अगस्त्य उवाच

भक्तस्थलं समाख्यातं भवता गणनायक ।



From http://sanskritdocuments.org

केन वा धर्मभेदेन भक्तो माहेश्वरो भवेत् ॥१०.१॥
रेणुक उवाच
केवलं सहजेदाने निष्णातः शिवतत्परः ।
ब्रह्मादिस्थान विमुखो भक्तो माहेश्वरः स्मृतः ॥१०.२॥
भक्तेर्यदा समुत्कर्षो भवेद्वैराग्य गौरवात् ।
तदा माहेश्वरः प्रोक्तो भक्तः स्थिर विवेकवान् ॥१०.३॥
माहेश्वरस्थलं वक्ष्ये यथोक्तं शम्भुना पुरा ।
माहेश्वर प्रशंसादौ लिङ्गनिष्ठा ततः परं ॥१०.४॥
पुर्वाश्रय निरासश्च तदाद्वैतनिराकृति ।
आह्वानवर्जनं पश्चादष्टमूर्ति निराकृतिः ॥१०.५॥
सर्वगत्य निरासश्च शिवत्वं विश्वभक्तयोः ।
एवं नवविधं प्रोक्तं माहेश्वर महास्थलं ॥१०.६॥
अदितः क्रमशो वक्ष्ये स्थल भेदस्य लक्षणं ।
समाहितेन मनसा श्रूयतां भवता मुने ॥१०.७॥
१६. महेश्वर प्रशंसा स्थलं
विश्वस्मा दधिको रुद्रो विश्वानुग्रहकारकः ।
इति यस्य स्थिरा बुद्धिः सवै माहेश्वर स्मृतः ॥१०.८॥
ब्रह्माद्वैर्मलिन प्रायैर्निर्मले परमेश्वरे ।
साम्योक्तिं योन सहते स वै माहेश्वराभिदः ॥१०.९॥
ईश्वरः सर्वभूतानां ब्रह्मादीनां महानिति ।
बुद्धियोगात्त दासक्तो भक्तो माहेश्वर स्मृतः ॥१०.१०॥
ब्रह्मादि देवता जालं मोहितं मायया सदा ।
आशक्तं मुक्ति दाने तुक्षयातिशयसण्युतं ॥१०.११॥
अनादिमुक्तो भगवानेक एव महेश्वरः ।
मुक्तिदश्चेतियो वेदसवैमाहेश्वरः स्मृतः ॥१०.१२॥
क्षयातिशयसण्युक्ता ब्रह्मविष्ण्वादि सम्पदः ।
तृणवन्मन्यते बुद्ध्या वीरमाहेश्वरः सदा ॥१०.१३॥
शब्द स्पर्शादि सम्पन्नो सुखलेशेतु निस्पृहः ।
शिवानन्दे समुत्कण्ठो वीरमाहेश्वरो भवेत् ॥१०.१४॥
परस्त्री सङ्गनिर्मुक्तः परद्रव्य पराङ्मुखः ।
शिवार्थ कार्य सम्पन्नः शिवागम परायणः ॥१०.१५॥
शिवस्तुति रसास्वाद मोदमानमनाः शुचिः ।
शिवोत्कर्षप्रमाणानां सम्पादनसमुद्यतः ॥१०.१६॥
निर्ममो निरहङ्कारो निरस्तक्लेश पञ्जरः ।
अस्पृष्टमद सम्बन्धो मात्सर्यावेश वर्जितः ॥१०.१७॥
निरस्तमदनोन्मेषो निर्धूतक्रोधविप्लवः ।


From http://sanskritdocuments.org

सदा सन्तुष्टहृदयः सर्वप्राणि हिते रतः ॥ १०.१८ ॥
निवारण समुद्योगी शिवकार्य विरोधिनां ।
सहचारी सदाकालं शिवोत्कर्षाभिदायिभिः ॥ १०.१९ ॥
शिवापकर्ष सम्प्राप्तौ प्राणत्यागेप्यशङ्कितः ।
शिवैकनिष्ठः सर्वात्मा वीरमाहेश्वरो भवेत् ॥ १०.२० ॥

१७. लिङ्गनिष्ठास्थलं

अन्य माहेश्वर स्योक्तं लिङ्गनिष्ठामहास्थलं ।
प्राणात्ययोपि सम्पन्ने यदत्याज्यं विधीयते ॥ १०.२१ ॥
अपगच्छतु सर्वस्वं शिरश्चेदनमस्तुवा ।
माहेश्वरो न मुञ्चेत्तु लिङ्गपूजा महाव्रतं ॥ १०.२२ ॥
लिङ्गपूजामकृत्यातु मानवायेन भुञ्जते ।
तेषां महात्मनां हस्ते मोक्षलक्ष्मी रुपस्थिता ॥ १०.२३ ॥
किमन्यैर्धर्मकलिलैः कीकसार्थ प्रदायिभिः ।
साक्षान्मोक्षप्रदः शम्भोर्धर्मो लिङ्गार्चनात्मकः ॥ १०.२४ ॥
अर्पितेनान्न पानेन लिङ्गेनियमपूजिते ।
ये देहवृत्तिङ्कुर्वन्ति महामहेश्वरा हिते ॥ १०.२५ ॥
चिन्मये शाङ्करे लिङ्गे स्थिरं येषां मनः सदा ।
विमु क्तेतर सर्वार्थं ते शिवा नात्र संशयः ॥ १०.२६ ॥
लिङ्गे यस्य मनोलीनं लिङ्गस्तुति परा चवाक् ।
लिङ्गार्चनपरौ हस्तौ स रुद्रो नात्र संशयः ॥ १०.२७ ॥
लिङ्गनिष्ठस्य किं तस्य कर्मणा स्वर्ग हेतुना ।
नित्यानन्द शिवप्राप्ति र्यस्य शास्त्रेषु निश्चिता ॥ १०.२८ ॥
लिङ्गनिष्ठापरं शान्तं भूति रुद्राक्ष सण्युतं ।
प्रशंसन्ति सदाकालं ब्रह्माद्या देवता मुदा ॥ १०.२९ ॥

१८. पूर्वाश्रय निरसन स्थलं

लिङ्गैक निष्ठ हृदयः सदा महेश्वरो जनः ।
पूर्वाश्रयगतान् धर्मांस्त्य जेत् स्वाचाररोधकान् ॥ १०.३० ॥
स्वजातिकुलजान् धर्मान् लिङ्गनिष्ठाविरोधिनः ।
त्यजन् माहेश्वरो ज्ञेयः पूर्वाश्रय निरासकः ॥ १०.३१ ॥
शिवसंस्कारयोगेन विशुद्धानां महात्मनां ।
किं पूर्वकालिकैर्धर्मैः प्राकृतानां हि ते मताः ॥ १०.३२ ॥
शिवसंस्कारयोगेन शिवधर्मानुषङ्गिणां ।
प्राकृतानां न धर्मेषु प्रवृत्ति रुप पद्यते ॥ १०.३३ ॥
विशुद्धाः प्राकृताश्चेति द्विविधा मानुषाः स्मृताः ।
शिवसंस्कारिणः शुद्धाः प्राकृता इतरे मताः ॥ १०.३४ ॥
वर्णाश्रमादि धर्माणां व्यवस्थाहिद्विधा मता ।


From http://sanskritdocuments.org

एका शिवेन निर्दिष्टा ब्रह्मणा कथिता परा ॥ १०.३५ ॥
शिवोक्त धर्म निष्णातु शिवाश्रम निषेविणं ।
शिव संस्कारहीनानां धर्मः पैता महःस्मृतः ॥ १०.३६ ॥

१९. सर्वाद्वैत निरसन स्थलं

पूज्यपूजकयोर्लिङ्ग जीवयोर्भेदवर्जने ।
पूजाकर्माद्यसम्पत्तेर्लिङ्ग निष्ठाविरोधतः ॥ १०.३७ ॥
सर्वाद्वैत विचारस्य ज्ञानाभावो व्यवस्थितः ।
भवेन्माहेश्वरः कर्मी सर्वाद्वैत निरासकः ॥ १०.३८ ॥
प्रेरकं शङ्करं बुद्ध्वा प्रेर्यमात्मनमेवच ।
भेदात्तं पूजयेन्नित्यं नचा द्वैता परोभवेत् ॥ १०.३९ ॥
पतिः साक्षान्महादेवः पशुरेष तदाश्रयः ।
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यति ॥ १०.४० ॥
साक्षात् कृतं परं तत्त्वं यदाभवति बोधतः ।
तदन् द्वैतसमापत्ति र्जानहीनस्यन क्वचित् ॥ १०.४१ ॥
भेदस्य कर्म हेतुत्वाद्व्यवहार प्रवर्तते ।
लिङ्गपूजादिकर्मस्थो नचान् द्वैतं समाचरेत् ॥ १०.४२ ॥
पूजादिव्यवहारः स्याद्भेदाश्रयतया सदा ।
लिङ्गपूजापरस्तस्मान्ना द्वैते निरतो भवेत् ॥ १०.४३ ॥

२०. आह्वान निरसन स्थलं

लिङ्गार्चन परः शुद्धः सर्वाद्वैत निरासकः ।
स्वेष्टलिङ्गे शिवाकारे न तमावाहयेच्छिवं ॥ १०.४४ ॥
यदा शिवकलायुक्तं लिङ्गं दद्यान्महागुरुः ।
तदारभ्य शिवस्तत्र तिष्टत्याह्वानमत्र किं ॥ १०.४५ ॥
स संस्कारेषु लिङ्गेषु सदा सन्निहितः शिवः ।
तत्राह्वानं न कर्तव्यं प्रतिपत्ति विरोधतः ॥ १०.४६ ॥
नाह्वानं न विसर्जं च स्वेष्टलिङ्गे तु कारयेत् ।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रस्य निश्चयः ॥ १०.४७ ॥

२१. अष्टमूर्ति निरसन स्थलं

यथात्म शिवयोरैक्यं न मतं कर्म सङ्गिनः ।
तथा शिवात् पृथिव्या देरद्वैतमपि नेष्यते ॥ १०.४८ ॥
पृथिव्याद्यष्टमूर्तित्वमीश्वरस्य प्रकीर्तितं ।
तदधिष्ठातृ भावेन न साक्षादेकभावतः ॥ १०.४९ ॥
पृथिव्याद्यात्म पर्यन्तप्रपञ्चोह्यष्टधास्थितः ।
नैतत्साक्षान्महेशोयं कुलालः कलशो यथा ॥ १०.५० ॥
पृथिव्याद्यात्मा पर्यन्तप्रपञ्चो ह्यष्टधास्थितः ।
तनुरीशस्य चात्मयं सर्वतत्त्व नियामकः ॥ १०.५१ ॥



From http://sanskritdocuments.org

शरीर भूतदेतस्मात् प्रपञ्चात्परमेष्ठिनः ।
आत्म भूतस्य देवस्य नाभेदो न पृथक् स्थितिः ॥ १०.५२॥
अचेतनत्वात् पृथ्व्या देरज्ञत्वादात्म नस्तथा ।
सर्वज्ञस्य महेशस्य नैकरूपत्वमिष्यते ॥ १०.५३॥
इतियश्चिन्तयेन्नित्यं पृथ्व्यादेरष्टमूर्ति तः ।
विलक्षणं महादेवं सोष्टमूर्ति निरासकः ॥ १०.५४॥

२२. सर्वगत्वनिरसनस्थलं

सर्वगत्वे महेशस्य सर्वत्राराधनं भवेत् ।
न लिङ्गमात्रे तन्निष्ठो न शिवं सर्वगं स्मरेत् ॥ १०.५५॥
सर्वगोपि स्थितः शम्भुः स्वाधारे हि विशेषतः ।
तस्मादन्यत्र विमुखः स्वेष्टलिङ्गे यजेच्छिवं ॥ १०.५६॥
शिवः सर्वगतश्चापि स्वाधारे व्यज्यते भृशं ।
शमीगर्भे यथावह्निर्विशेषेण विभाव्यते ॥ १०.५७॥
सर्वगत्वं महेशस्य सर्वशास्त्र विनिश्चितं ।
तथाप्याश्रयलिङ्गादौ पूजार्थमधिका स्थितिः ॥ १०.५८॥
तस्मात्सर्वप्रयत्नेन सर्वस्थान पराङ्मुखः ।
स्वेष्टलिङ्गे महादेवं पूजयेत्पूजकोत्तमः ॥ १०.५९॥
शिवस्य सर्वगत्वेपि सर्वत्र रतिवर्जितः ।
स्वेष्टलिङ्गे यजन् देवं सर्वगत्व निरासकः ॥ १०.६०॥

२३. शिवजगन्मयस्थलं

पूजा विधौ नियम्यत्वाल्लिङ्ग मात्रे स्थितं शिवं ।
पूजयन्नपि देवस्य सर्वगत्वं विभावयेत् ॥ १०.६१॥
यस्मादेतत्समुत्पन्नं महादेवाच्चराचरं ।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः ॥ १०.६२॥
शिवतत्त्वात्समुत्पन्नं जगदस्मान्नभिद्यते ।
फेनोर्मिबुद्बुदाकारो यथासिन्धोर्नभिद्यते ॥ १०.६३॥
यथा तन्तुभिरुत्पन्नः पटस्तन्तुमयः स्मृतः ।
तथा शिवात्समुत्पन्नं शिव एव चराचरं ॥ १०.६४॥
आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः ।
कुटीभावाद्यथा भाति पटः स्वस्य प्रसारणात् ॥ १०.६५॥
पत्रशाखादिरूपेण यथा तिष्ठति पादपः ।
तथा भूम्यादिरूपेण शिव एको विराजते ॥ १०.६६॥

२४. भक्तदेहिक लिङ्गस्थलं

समस्तजगदात्मापि शङ्करः परमेश्वरः ।
भक्तानां हृदयाम्भोजे विशेषेण विराजिते ॥ १०.६७॥
कैलासे मन्दरे चैव हिमाद्रौ कनकाचले ।



From http://sanskritdocuments.org

हृदयेषु च भक्तानां विशेषेण शिवः स्थितः ॥ १०.६८ ॥
सर्वात्मापि परिच्छिन्नो यथा देहेषु वर्तते ।
तथास्वकीयभक्तेषु शङ्करो भासते सदा ॥ १०.६९ ॥
नित्यं भाति त्वदीयेषु या ते रुद्र शिवा तनूः ।
अघोरा पापकाशीति श्रुतिराह सनातनी ॥ १०.७० ॥
विशुद्धेषु विरक्तेषु विवेकिषु महात्मसु ।
शिवस्तिष्ठति सर्वात्मा शिवलाण्छन धारिषु ॥ १०.७१ ॥
नित्यं सन्तोषयुक्तानां ज्ञाननिर्धूतकर्मणां ।
माहेश्वराणा मन्तस्थो विभाति परमेश्वरः ॥ १०.७२ ॥
अन्यत्र शम्भोरति मात्रशून्यो निजेष्ठलिङ्गे नियतान्तरात्मा ।
शिवात्मकं विश्वमिदं विबुध्यन् माहेश्वरोसौ भवति प्रसादी ॥ १०.७३ ॥
इति श्री सिद्धान्त शिखामणौ महेश्वरस्थितो महेश्वर प्रशंसादि
नवविध स्थल प्रसङ्गोनाम दशम परिच्छेदः परिसमाप्तः ॥१०॥

---

एकादशपरिच्छेदः

अगस्त्य उवाच

उक्तो माहेश्वर स्साक्षाल्लिङ्ग निष्ठादिधर्मवान् ।
कथमेष प्रसादीति कथ्यते गणनायक ॥ ११.१ ॥

रेणुक उवाच

लिङ्गनिष्ठादिभावेन ध्वस्तपापनिबन्धनः ।
मनः प्रसादयोगेन प्रसादीत्येष कथ्यते ॥ ११.२ ॥
प्रसादिस्थलमित्येतदन्य माहत्म्य बोधकं ।
अन्तरस्थल भेदेन सप्तधा परिकिर्तीतं ॥ ११.३ ॥
प्रसादिस्थलमादौतुगुरुमहात्म्यकं ततः ।
ततो लिङ्गप्रशंसाचततो जङ्गम गौरवं ॥ ११.४ ॥
ततो भक्तस्य माहत्म्यं ततः शरण कीर्तनं ।
शिवप्रसादमाहत्म्यमिति सप्तप्रकारकं ।
क्रमाल्लक्षणमेतेषां कथयामि महामुने ॥ ११.५ ॥

२५. प्रसादि स्थलं

नैर्मल्यं मनसो लिङ्गं प्रसाद इतिकथ्यते ।
शिवस्य लिङ्गरूपस्य प्रसादादेव सिद्ध्यति ॥ ११.६ ॥
शिवप्रसादो यद्द्रव्यं शिवाय विनि वेदितं ।
निर्माल्यं तत्तु शैवानां मनो नैर्मल्यकारणं ॥ ११.७ ॥
मनः प्रसाद सिद्ध्यर्थं निर्मल ज्ञान कारणं ।
शिवप्रसादं स्वीकुर्यान् प्रसादीत्येष कथ्यते ॥ ११.८ ॥


From http://sanskritdocuments.org

अन्न शुद्ध्या हि सर्वेषां तत्त्वशुद्धि रुदाहृता ।
विशुद्ध मन्न जातं हि यच्छिवाय समर्पितं ॥ ११.९ ॥
तदेव सर्वकालं तु भुञ्जानो लिङ्ग तत्परः ।
मनः प्रसादमतुलं लभते ज्ञानकारणं ॥ ११.१० ॥
आत्मभोगाय नियतं यद्यद्द्रव्यं समाहितं ।
तत्तत्समर्प्य देवाय भुञ्जीतात्म विशुद्धये ॥ ११.११ ॥
नित्यसिद्धेन देवेन भिषजा जन्मरोगिणां ।
यद्यत्प्रसादितं भुक्त्वा तत्तज्जन्म रसायनं ॥ ११.१२ ॥
आरोग्यकारणं पुंसामन्तःकरण शुद्धिदं ।
तापत्रयमहारोगसमुद्धरण भेषजं ॥ ११.१३ ॥
विद्यावैशद्यकरणं विनिपात विघातनं ।
द्वारं ज्ञानावतारस्य मोहच्छेदस्य कारणं ॥ ११.१४ ॥
वैराग्यसम्पदो मूलं ममानन्दप्रवर्थनं ।
दुर्लभं पापचित्तानां सुलभं शुद्धकर्मणां ॥ ११.१५ ॥
अदृतं ब्रह्मा विष्णवा द्विर्य सिष्ठाद्विश्च तापसैः ।
शिवस्वीकृतमन्नाद्यं स्वीकार्यं सिद्धि काङ्क्षिभिः ॥ ११.१६ ॥
पत्रं पुष्पं फलं तोयं यच्छिवाय निवेदितं ।
तत्तत् स्वीकार योगेन सर्व पापक्षयो भवेत् ॥ ११.१७ ॥

२६. गुरुमाहत्म्य स्थलं

यथा शिवप्रसादान्नं स्वीकार्यं लिङ्गतत्परैः ।
तथागुरोः प्रसादान्नं तथैव शिवयोगिनां ॥ ११.१८ ॥
गुरुरेवात्र सर्वेषां कारणं सिद्धि कर्मणां ।
गुरुरूपो महादेवो यतः साक्षादुपस्थितः ॥ ११.१९ ॥
निष्कलोनपि महादेवो नित्यज्ञानमहोदधिः ।
सकलो गुरुरूपेण सर्वानुग्राहको भवेत् ॥ ११.२० ॥
यः शिवः स गुरुर्ज्ञेयो यो गुरुः स शिवः स्मृतः ।
न तयोरन्तरं कुर्याद् ज्ञानावाप्त्यै महामतिः ॥ ११.२१ ॥
हस्त पादादि सौम्येन नेतरैः सदृशं वदेत् ।
आचार्यं ज्ञानदं शुद्धं शिवरूपतया स्थितं ॥ ११.२२ ॥
आचार्य स्यावमानेन श्रेयःप्राप्ति र्विहन्यते ।
तस्मान्निश्रेयसः प्राप्त्यै पूजयेत्तं समाहितः ॥ ११.२३ ॥
गुरुभक्ति विहीनस्य शिवभक्तिर्नजायते ।
अतः शिवे यथा भक्ति स्तथा भक्तिर्गुरावपि ॥ ११.२४ ॥

२७. लिङ्गमाहत्म्यस्थलं

गुरुमाहत्म्य योगेन निजज्ञानातिरेकतः ।
लिङ्गस्यापिच माहत्म्यं सर्वोत्कृष्टं विभाव्यते ॥ ११.२५ ॥


From http://sanskritdocuments.org

शिवस्य बोधलिङ्गं यद्गुरु बोधित चेतसा ।
तदेव लिङ्गं विज्ञेयं शाङ्करं सर्वकारणं ॥ ११.२६ ॥
परं पवित्रममलं लिङ्गं ब्रह्म सनातनं ।
शिवाभिदानं चिन्मात्रं सदानन्दं निरङ्कुशं ॥ ११.२७ ॥
कारणं सर्वलोकानां वेदानामपि कारणं ।
पूरणं सर्वतत्त्वानां तारणं जन्मवारिधेः ॥ ११.२८ ॥
ज्योतिर्मयमनिर्देश्यं योगिनामात्मनि स्थितं ।
कथं विज्ञायते लोके महागुरुदयां विना ॥ ११.२९ ॥
ब्रह्मणा विष्णुना पूर्वं यल्लिङ्गं ज्योतिरात्मकं ।
अपरिच्छेद्य मभवत् केन वा परिबोध्यते ॥ ११.३० ॥
बहुनात्र किमुक्तेन लिङ्गं ब्रह्म सनातनं ।
योगिनो यत्र लीयन्ते मुक्त पाशनिबन्धनाः ॥ ११.३१ ॥
पीठिका परमा शक्ति र्लिङ्गं साक्षात्परः शिवः ।
शिवशक्ति समायोगं विश्वं लिङ्गं तदुच्यते ॥ ११.३२ ॥
ब्रह्मादयः सुराः सर्वे मुनयः शौनकादयः ।
शिवलिङ्गार्चना देव स्वं स्वं पदमवाप्नुवन् ॥ ११.३३ ॥
विश्वाधिपत्य मीशस्य लिङ्गमूर्ते स्वभावजं ।
अनन्य देव सादृश्यं श्रुतिराहसनातनी ॥ ११.३४ ॥

२८. जङ्गम माहत्म्यस्थलं

गुरुशिष्यसमारूढलिङ्ग माहत्म्य सम्पदः ।
सर्वचिद्रूपविज्ञानाज्जङ्ग माधिक्यमुच्यते ॥ ११.३५ ॥
जानन्त्यतिशया द्ये तु शिवं विश्वप्रकाशकं ।
स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः ॥ ११.३६ ॥
ये पश्यन्ति जगज्जालं चिद्रूपं शिवयोगतः ।
निर्धूतमल संस्पर्शास्ते स्मृताः शिवयोगिनः ॥ ११.३७ ॥
घोर संसार तिमिरपरिध्वंसन कारणं ।
येषामस्ति शिवज्ञानं ते मताः शिवयोगिनः ॥ ११.३८ ॥
समाः शत्रौ च मित्रे च साक्षात्कृत शिवात्मकाः ।
निःस्पृहा निरहङ्कारा वर्तन्ते शिवयोगिनः ॥ ११.३९ ॥
दुर्लभं हि शिवज्ञानं दुर्लभं हि शिवचिन्तनं ।
येषामेतद्द्वयं चासि तेहि साक्षाच्छिवात्मकाः ॥ ११.४० ॥
पादाग्ररेणवो यत्र पतन्ति शिवयोगिनां ।
तदेव सदनं पुण्यं पावनं गृहमेधिनां ॥ ११.४१ ॥
सर्वसिद्धिकरं पुंसां दर्शनं शिवयोगिनां ।
स्पर्शनं पापशमनं पूजनं मुक्ति साधनं ॥ ११.४२ ॥
महतां शिवतात्पर्यवेदिनामनुमोदिनां ।


From http://sanskritdocuments.org

किम्वाफलं हिनोसिद्ध्येत् सम्पर्काच्छिवयोगिनां ॥ ११.४३ ॥

२९. भक्तमाहत्म्य स्थलं

गुरोर्लिङ्गस्य माहत्म्यकथनाच्छिवयोगिनां ।
सिद्धं भक्तस्य माहत्म्यं तथा ह्येष प्रशस्यते ॥ ११.४४ ॥
ये भजन्ति महादेवं परमात्मा समव्ययं ।
कर्मणा मनसा वाचा ते भक्ता इति कीर्तिताः ॥ ११.४५ ॥
दुर्लभाः हि शिवे भक्तिः संसारभयतारिणी ।
सा यत्र वर्तते साक्षात् स भक्त इति गीयते ॥ ११.४६ ॥
किं वेदैः किं ततः शास्त्रैः किं यज्ञैः किं तपोव्रतैः ।
नास्ति चेच्छाङ्करी भक्ति र्देहिनां जन्मरोगितां ॥ ११.४७ ॥
शिवभक्ति विहीनस्य सुकृतं चापि निष्फलं ।
विपरीत फलं च स्याद्दक्षस्यापि महाध्वरे ॥ ११.४८ ॥
अत्यन्त पापकर्मापि शिवभक्त्या विशुद्ध्यति ।
चण्डो यथा पूराभक्त्या पितृहापिशिवोभवत् ॥ ११.४९ ॥
सुकृतं दुष्कृतं चापि शिव भक्तस्य नास्ति हि ।
शिवभक्ति विहीना नां कर्मपाश निबन्धनं ॥ ११.५० ॥
शिवाश्रितानां जन्तूनां कर्मना नास्ति सङ्गमः ।
वाजिनां दिननाथस्य कथं तिमिरजं भयं ॥ ११.५१ ॥
निरोद्धुं नक्षमं कर्म शिवभक्तान् विशृङ्खलान् ।
कथं मत्तगजान् रुन्धे च्छृङ्खला बिसतन्तुजा ॥ ११.५२ ॥
शुद्धा नियमसण्युक्ताः शिवार्पित फलागमाः ।
येर्चयन्ति शिवं लोके विज्ञेयास्ते गणेश्वराः ॥ ११.५३ ॥

३०. शरण माहत्म्यस्थलं

गुरुलिङ्गादि महात्म्य बोधान्वेषणसङ्गतः ।
सर्वात्मना शिवापत्तिः शरण स्थानमुच्यते ॥ ११.५४ ॥
ब्रह्मादि विबुधान् सर्वान् मुक्त्वा प्राकृत वैभवान् ।
प्रपद्यते शिवं यत्तु शरणं तदुदाहृतं ॥ ११.५५ ॥
शरण्यः सर्वभूतानां शङ्करः शशिशेखरः ।
सर्वात्मना प्रसन्नस्तं शरणागत उच्यते ॥ ११.५६ ॥
विमुक्त भोगलालस्यो देवतान्तरनिः स्पृहः ।
शिवमभ्यर्थयन् मोक्षं शरणार्थीति गीयते ॥ ११.५७ ॥
ये प्रपन्ना महादेवं मनोवाक्कायकर्मभिः ।
तेषान्तु कर्मजातेन किं वा देवादितर्पणैः ॥ ११.५८ ॥
सर्वेषामपि यज्ञानां क्षयी स्वर्गफलायते ।
अक्षयं फलमाप्नोति प्रपन्नः परमेश्वरं ॥ ११.५९ ॥
प्रपन्न पारिजातास्य शिवस्य परमात्मनः ।


From http://sanskritdocuments.org

प्रपत्त्या किं न जायेत पापिनामपि देहिनां ॥ ११.६०॥
प्रपन्नानां महादेवं परिपक्वान्तरात्मनां ।
जन्मैव जन्मनान्येषां वृथा जननसङ्गिनां ॥ ११.६१॥
दुर्लभं मानुषं प्राप्य जननं ज्ञानसाधनं ।
येन जानन्ति देवेशं तेषामात्म निरर्थकः ॥ ११.६२॥
तत्कुलं हि सदा शुद्धं सफलं तस्य जीवितं ।
यस्य चित्तं शिवे साक्षाद्विलीनमबहिर्मुखं ॥ ११.६३॥

३१. प्रसाद माहत्म्य स्थलं

गुरुलिङ्गादि माहत्म्य विशेषानुभवस्थितिः ।
यस्माच्छिव प्रसादात् स्यात्त दस्य महिमोच्यते ॥ ११.६४॥
सदा लिङ्गैकनिष्ठानां गुरुपूजानुषङ्गिणां ।
प्रपन्नानां विशुद्धानां प्रसीदति महेश्वरः ॥ ११.६५॥
प्रसादोनपि महेशस्य दुर्लभः परिकीर्त्यते ।
घोरसंसार सन्तापनिवृत्ति र्येन जायते ॥ ११.६६॥
यज्ञास्तपांसि मन्त्राणां जपश्चिन्ता प्रबोधनं ।
प्रसादार्थं महेशस्य कीर्तितानि न संशयः ॥ ११.६७॥
प्रसादमूलाः सर्वेषां भक्तिरव्यभिचारिणी ।
शिवप्रसादहीनस्य भक्तिश्चापि न सिद्ध्यति ॥ ११.६८॥
गर्भस्थो जायमानो वा जातो वा ब्राह्मणोन थवा ।
अन्त्यजो वा पि मुच्येत प्रसादे सति शाङ्करे ॥ ११.६९॥
ब्रह्माद्या विबुधाः सर्वे स्वस्वस्थानिवासिनः ।
नित्यसिद्धा भवन्त्येव प्रसादात्परमेश्वरात् ॥ ११.७०॥
प्रसादे शाम्भवे सिद्धे परमानन्दकारिणी ।
सर्वंशिवमयं विश्वं दृश्यते नात्र संशयः ॥ ११.७१॥
संसारचक्र निर्वाहनिमित्तं कर्मकेवलं ।
प्रसादेनविना शम्भोर्नकस्यापि निवर्तते ॥ ११.७२॥
बहुनात्र किमुक्तेन नास्ति नास्ति जगत्रये ।
समानमधिकं चापि प्रसादस्य महेशितुः ॥ ११.७३॥
शिवप्रसादेसति योगा भाजः सर्वं शिवैकात्मत याविभाति ।
स्वकर्म मुक्तः शिव भावितात्मं सप्राणि लिङ्गीतिनि गद्यतेसौ ॥ ११.७४॥
इति श्री सिद्धान्त शिखामणौ प्रसादिस्थले प्रसादिस्थलादि सप्तविध
स्थल प्रसङ्गोनाम एकादश परिच्छेदः परिसमाप्तः ॥११॥

---

द्वादश परिच्छेदः

अगस्त्य उवाच



From http://sanskritdocuments.org

भक्तो माहेश्वर श्चेति प्रसादीति निबोधितः ।
एक एव कथं चैष प्राणलिङ्गीति कथ्यते ॥ १२.१॥

रेणुक उवाच

भक्तो माहेश्वर श्चेति प्रसादीति च कीर्तितः ।
कर्मप्राधान्ययोगेन ज्ञानयोगोस्य कथ्यते ॥ १२.२॥
लिङ्गं चिदात्मकं ब्रह्म तच्छक्तिः प्राणरूपिणी ।
तद्रूपलिङ्ग विज्ञानी प्राणलिङ्गीति कथ्यते ॥ १२.३॥
प्राणलिङ्गि स्थलं चैतत्पञ्च स्थलमन्वितं ।
प्राणलिङ्गिस्थलं चादौ प्राण लिङ्गार्चनं ततः ॥ १२.४॥
शिवयोग समाधिश्च ततो लिङ्गनिजस्थलं ।
अङ्गलिङ्ग स्थलं चाथ क्रमादेषां भिदोच्यते ॥ १२.५॥

३२. प्राणलिङ्गि स्थलं

प्राणा पानसमाघातात् कन्दमध्याद्यदुत्थि तं ।
प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः ॥ १२.६॥
प्राणो यत्र लयं याति भास्करेन्दु विघट्टनात् ।
तत् प्राण लिङ्ग मुद्दिष्टं तद्धारि स्यात्त दाकृतिः ॥ १२.७॥
ज्ञानिनां योगयुक्तानामन्तःस्फुरति दीपवत् ।
चिदाकारं परं ब्रह्म लिङ्ग मज्ञैर्न भाव्यते ॥ १२.८ ॥
अन्तः स्थितं परं लिङ्गं ज्योती रूपं शिवात्मकं ।
विहाय बाह्य लिङ्गस्था विमूढा इति कीर्तिताः ॥ १२.९॥
नं विल्लिङ्ग परामर्शी बाह्य वस्तु पराङ्मुखिः ।
यः सदा वर्तते योगी प्राणलिङ्गी स उच्यते ॥ १२.१०॥
माया विकल्पजं विश्वं हेयं सञ्चित्य नित्यशः ।
चिदानन्दमये लिङ्गे विलीनः प्राण लिङ्गवान् ॥ १२.११॥
सत्ता प्राणयमी शक्तिः सद्रूपं प्राण लिङ्गकं ।
तत्सामरस्य विज्ञानात् प्राणलिङ्गीति कथ्यते ॥ १२.१२॥

३३. प्राण लिङ्गार्चन स्थलं

अन्तर्गतं चिदाकारं लिङ्गं शिवमयं परं ।
पूज्यते भावपुष्पैर्यत्प्राण लिङ्गार्चनं हितत् ॥ १२.१३॥
अन्तः पवनसंस्पृष्टे सुसूक्ष्माम्बरशोभिते ।
मूर्धन्य चन्द्र विगलत्सुधासेकातिशीतले ॥ १२.१४॥
बद्धेन्द्रियनवद्वारे बोधदीपे हृदालये ।
पद्मपीठे समासीनं चिल्लिङ्गं शिवविग्रहं ।
भावयित्वा सदाकालं पूजयेद्भाववस्तुभिः ॥ १२.१५॥
क्षमाभिषेक सलिलं विवेको वस्त्रमुच्यते ।
सत्यमाभरणं प्रोक्तं वैराग्यं पुष्पमालिका ॥ १२.१६॥


From http://sanskritdocuments.org

गन्धः समादिसम्पत्ति रक्षतानिरहं कृतिः ।
श्रद्धा धूपो महाज्ञानं जगद्भासि प्रदीपिका ॥ १२.१७ ॥
भ्रान्ति मूल प्रपञ्चस्य नैवेद्यं तन्निवेदनं ।
मौनं घण्टापरिस्पन्दस्ताम्बूलं विषमार्पणं ॥ १२.१८ ॥
विषयभ्रान्तिराहित्यं तत् प्रदक्षिण कल्पना ।
बुद्धिस्तदात्मिकासक्ति र्नमस्कारक्रियामता ॥ १२.१९ ॥
एवं विधैर्भावशुद्धैरुपरि चारैरदूषितैः ।
प्रत्यङ्मुखमना भूत्वा पूजयेल्लिङ्ग मान्तरं ॥ १२.२० ॥

३४. शिवयोग समाधि स्थलं

अन्तःक्रियारतस्यास्य प्राणलिङ्गार्चन क्रमैः ।
शिवात्म ध्यानसम्पत्तिः समाधिरिति कथ्यते ॥ १२.२१ ॥
सर्वतत्त्वोपरिगतं सच्चिदानन्द भासुरं ।
परब्रह्म महालिङ्गं प्राणो जीवः प्रकीर्तितः ।
तदेक बावमननात् समाधिस्थः प्रकीर्तितः ॥ १२.२२ ॥
बहिर्वासनमा विश्वं विकल्पार्थं प्रकाशते ।
अन्तर्वासितचित्ता नामात्मानन्दः प्रकाशते ॥ १२.२३ ॥
आत्मारणिसमुत्थेन प्रमोदमथनात्सुधीः ।
ज्ञानाग्निना दहेत्सर्वं पाशजालं जगन्मयं ॥ १२.२४ ॥
संसार विषवृक्षस्य पञ्चक्लेशः फलाशिनः ।
छेदने कर्म मूलस्य परशुः शिवभावना ॥ १२.२५ ॥
अज्ञानराक्षसोन्मेषकारिणः सम्हृतात्मना ।
शिवध्यानन्तु संसारतमसश्चण्ड भास्करः ॥ १२.२६ ॥
अन्तःषट्चक्ररूपाणि पङ्कजानि विभावयेत् ।
ब्रह्मादिस्थान भूतानि भ्रूमध्यान्तानि मूलतः ॥ १२.२७ ॥
भ्रूमध्यादूर्ध्वभागे तु सहस्रदलमम्बुजं ।
भावयेत्तत्र विमलं चन्द्रबिम्बं तदन्तरे ॥ १२.२८ ॥
सूक्ष्मरन्ध्रं विजानियात् तत्कैलासपदं विदुः ।
तत्रस्थं भावयेच्छम्भुं सर्वकारण कारणं ॥ १२.२९ ॥
सर्वतत्त्वोपरिगतं सच्चिदानन्द भासुरं ।
स्वप्रकाशमनिर्धेश्य वाङ्मानस गोचरं ॥ १२.३० ॥
उमाख्यया महाशक्त्या दीपितं चित्स्वरूपया ।
हंसरूपं परात्मनं सोहम्भावेन भावयेत् ।
तदेकतानता सिद्धिः समाधिः परमो मतः ॥ १२.३१ ॥

३५. लिङ्गनिज स्थलं

स्वान्तःस्थ शिवलिङ्गस्य प्रत्यक्षानुभवस्थितिः ।
या सैव परलिङ्गस्य निजमित्युच्यते बुधैः ॥ १२.३२ ॥



From http://sanskritdocuments.org

अव्यक्तं लिङ्गमित्याहुर्जगतां मूलकारणं ।
लिङ्गी महेश्वर श्चेति मतमेतदसङ्गतं ॥ १२.३३॥
चिदानन्दमयः साक्षाच्छिव एव निरञ्जनः ।
लिङ्गमित्युच्यते वान्यद्यतः स्याद्विश्व सम्भवः ॥ १२.३४॥
ब्रह्मविष्ण्वादयो देवाः सर्वे वेदादयस्तथा ।
लीयन्ते यत्र गम्यन्ते तल्लिङ्गं ब्रह्म केवलं ॥ १२.३५॥
बहुनात्र किमुक्तेन लिङ्गमित्युच्यते बुधैः ।
शिवाभिधं परं ब्रह्म चिद्रूपं जगदास्पदं ॥ १२.३६॥
ज्योतिर्मयं परं लिङ्गं श्रुतिराह शिवात्मकं ।
तस्यभासा सर्वमिदं प्रतिभाति न संशयः ॥ १२.३७॥
न सूर्यो भाति तत्रेन्दुन्न विद्युन्न च पावकः ।
न तारका महालिङ्गे द्योतमाने परात्मनि ॥ १२.३८॥
लिङ्गान्नास्ति परं तत्त्वं यदस्माज्ञायते जगत् ।
यतेतद्रूपतान्धत्ते यदत्र लयमश्नुते ॥ १२.३९॥
तस्माल्लिङ्गं परं ब्रह्म सच्चिदानन्दलक्षणं ।
निजरूपमिति ध्यानात्त दवस्था प्रजायते ॥ १२.४०॥

३६. अङ्ग लिङ्ग स्थलं

ज्ञानमङ्गमिति प्राहुर्ज्ञेयन्लिङ्गं सनातनं ।
विद्यते तद्द्वयं यस्य सोङ्गन्लिङ्गीति कीर्तितः ॥ १२.४१॥
अङ्गे लिङ्गं समारूढं लिङ्गे चाङ्गमुपस्थितं ।
एतदस्ति द्वयं यस्य स भवेदङ्गलिङ्गवान् ॥ १२.४२॥
ज्ञात्वा यः सततं लिङ्गं स्वान्तस्थं ज्योतिरात्मकं ।
पूजयेद्भावकुसुमैस्तं विद्यादङ्ग लिङ्गिनं ॥ १२.४३॥
ज्ञायते लिङ्गमे वैकं सर्वैः शास्त्रैः सनातनैः ।
ब्रह्मेति विश्वधामेति विमुक्तेः पदमित्यपि ॥ १२.४४॥
मुक्तिरूपमिदं लिङ्गमिति यस्य मनस्थितिः ।
स मुक्तो देहयोगेपि सज्ञानी स महागुरुः ॥ १२.४५॥
अनादिनिधनं लिङ्गं कारणं जगतामिति ।
येन जानन्ति ते मूढा मोक्षमार्गे बहिष्कृताः ॥ १२.४६॥
यः प्राणलिङ्गार्चन भावपूर्वै धर्मैरुपेतः शिवभावितात्मा ।
स एव तुर्यः परिकीर्त्यतेसौ सम्विद्विपा का च्छरणा भिदानः ॥ १२.४७॥
इति श्री सिद्धान्त शिखामणौ प्राणलिङ्गिस्थले प्राणलिङ्गि स्थलादि
पञ्चस्थल प्रसङ्गोनाम द्वादश परिच्छेदः परिसमाप्तः ॥१२॥

---

त्रयोदश परिच्छेदः


From http://sanskritdocuments.org

अगस्त्य उवाच

माहेश्वरः प्रसादीति प्राणिलिङ्गीति बोधितः ।
कथमेष समादिष्टः पुनः शरण संज्ञकः ॥ १३.१ ॥

श्री रेणुक उवाच

अङ्गलिङ्गी ज्ञानरूपः सतीज्ञेयः शिवः पतिः ।
यत्सौख्यं तत्समावेशे तद्वान् शरणनामवान् ॥ १३.२ ॥
स्थलमेतत्समाख्यातं चतुर्था धर्मभेदतः ।
अदौ शरणमाख्यातं ततस्तामसवर्जनं ॥ १३.३ ॥
निर्देशश्च ततः प्रोक्तः शीलसम्पादनं ततः ।
क्रमाल्लक्षणमे तेषां कथयामि निशम्यतां ॥ १३.४ ॥

३७. शरण स्थलं

सतीव रमणे यस्तु शिवे शक्तिं विभावयन् ।
तदन्यविमुखः सोर यं ज्ञातः शरणनामवान् ॥ १३.५ ॥
परिज्ञाते शिवे साक्षात् को वान्यमभिकाङ्क्षति ।
निधाने महति प्राप्ते कः काचं याचतेन्यतः ॥ १३.६ ॥
शिवानन्दं समासाद्य कोवान्यमुपतिष्ठते ।
गङ्गामृतं परित्यज्य कः काङ्क्षेन्मृगतृष्टिकां ॥ १३.७ ॥
संसारतिमिरच्छेदे विना शङ्कर भास्करं ।
प्रभवन्ति कथं देवाः खद्योता इव देहिनां ॥ १३.८ ॥
संसारार्तः शिवं यायाद्ब्रह्माद्यैः किं फलं सुरैः ।
चकोरस्तृषितः पश्येच्चन्द्रं किं तारका अपि ॥ १३.९ ॥
शिव एव समस्तानां शरण्यः शरणार्थिनां ।
संसारोरगदष्टानां सर्वज्ञाः सर्वदोषहा ॥ १३.१० ॥
शिवज्ञाने समुत्पन्ने परानन्दः प्रकाशते ।
तदासक्त मना योगी नान्यत्र रमते सुधीः ॥ १३.११ ॥
तस्मात्सर्व प्रयत्नेन शङ्करं शरणं गतः ।
तदनन्तसुखं प्राप्य मोदते नान्य चिन्तया ॥ १३.१२ ॥

३८. तामस निरसन स्थलं

शिवभक्ति परानन्दमोदिना गुरुणा यतः ।
निरस्यन्ते तमोभावाः स तामस निरासकः ॥ १३.१३ ॥
यस्य ज्ञानं तमोमिश्रं न तस्य गतिरिष्यते ।
सत्वं हि ज्ञानयोगस्य नैर्मल्यं विदुरुत्तमाः ॥ १३.१४ ॥
शमोदमो विवेकश्च वैराग्यं पूर्णभावना ।
क्षान्तिः कारुण्य सम्पत्तिः श्रद्धा सत्य समुद्भवा ॥ १३.१५ ॥
शिवभक्तिः परोधर्मः शिवज्ञानस्य बान्धवाः ।
ए तैर्युक्तो महायोगी सात्विकः परिकीर्तितः ॥ १३.१६ ॥



From http://sanskritdocuments.org

कामक्रोध महामोहमदमत्सरवारणाः ।
शिवज्ञानमृगेन्द्रस्य कथं तिष्ठन्ति सन्निधौ ॥ १३.१७ ॥
यत्र कुत्रपि यो द्वेष्टि प्रपञ्चे शिवरूपिणि ।
शिवद्वेषी न विज्ञेयो रजसाविष्टमानसः ॥ १३.१८ ॥
यो द्वेष्टि सकलान् लोकान् योवान् हङ्कुरुतेसदा ।
यो सत्यभावनायुक्तः स तामस इति स्मृतः ॥ १३.१९ ॥
तमोमूल हि सञ्जाता रागद्वेषादिपादपाः ।
शिवज्ञानकुठारेण छिद्यन्ते हि निरन्तरं ॥ १३.२० ॥
शिवज्ञाने समुत्पन्ने सहस्रादित्यसन्निभे ।
कुतस्तयोविकाराः स्युर्महतां शिवयोगिनां ॥ १३.२१ ॥

३९. निर्देशन स्थलं

निराकृत्य तमोभागं संसारस्य प्रवर्तकं ।
निर्दिश्यते तु यद् ज्ञानं स निर्देश इति स्मृतः ॥ १३.२२ ॥
गुरुरेव परं तत्त्वं प्रकाशयति देहिनां ।
को वा सूर्यं विना लोके तमसो विनिवर्तकः ॥ १३.२३ ॥
अन्तरेण गुरुं सिद्धं कथं संसारनिष्कृतिः ।
निदानज्ञां विना वैद्यं को वा रोगो निवर्तते ॥ १३.२४ ॥
अज्ञानमलिनं चित्त दर्पणं यो विशोधयेत् ।
प्रज्ञा विभूतियोगेन तमाहुर्गुरुसत्तमं ॥ १३.२५ ॥
अपरोक्षिततत्त्वस्य जीवन्मुक्त स्वभाविनः ।
गुरोः कटाक्षे संसिद्धे कोवा लोकेषु दुर्लभः ॥ १३.२६ ॥
कैवल्य कल्पतरवो गुरवः करुणालयाः ।
दुर्लभाहि जगत्यस्मिन् शिवद्वैत परायणाः ॥ १३.२७ ॥
क्षाराब्धिरिव सिन्धूनां सुमेरुरिव भूभृतां ।
ग्रहाणामिव तिग्मांशुर्मणीनामिव कौस्तुभः ॥ १३.२८ ॥
द्रुमाणा मिव भद्र श्रीर्देवाना मिव शङ्करः ।
गुरुः शिवः परः श्लाघ्योगुरूणां प्राकृतात्मनां ॥ १३.२९ ॥

४०. शील सम्पादन स्थलं

जिज्ञासा शिवतत्त्वस्य शीलमित्युच्यते बुधैः ।
निर्देशयोगादार्याणां तद्वान् शीलीति कथ्यते ॥ १३.३० ॥
प्रसन्नार्ति हरे देवे परमात्मनि शङ्करे ।
भावस्य स्थिरतायोगः शीलमित्युच्यते बुधैः ॥ १३.३१ ॥
शीलं शिवैक विज्ञानं शिवध्यानैकतानता ।
शिवप्राप्ति समुत्कण्ठा तद्योगी शीलवान स्मृतः ॥ १३.३२ ॥
शिवादन्यत्र विज्ञाने वैमुख्यं यस्य सुस्थिरं ।
तदासक्ता मनोवृत्ति स्तमाहुः शीलभाजनं ॥ १३.३३ ॥


From http://sanskritdocuments.org

पतिव्रताया यच्छीलं पतिरागात्प्रशस्यते ।
तथा शिवानुरागेण सुशीलो भक्त उच्यते ॥ १३.३४ ॥
पतिं विना यथा स्त्रीणां सेवान्यस्यतुगर्हणा ।
शिवं विना तथान्येषां सेवा निन्दाकृतात्मनां ॥ १३.३५ ॥
बहुनात्रकिमुक्तेन शिवज्ञानैकनिष्ठता ।
शीलमित्युच्यते सद्भिः शीलवां स्तत्परो मतः ॥ १३.३६ ॥
शिवात्म बोधैकरतः स्थिराशयः शिवं प्रपन्नो जगतामधीश्वरं ।
शिवैकनिष्ठाहित शील भूषणः शिवैक्यवा नेष हि कथ्यते बुधैः ॥ १३.३७ ॥
इति श्री सिद्धान्त शिखामणौ शरणस्थले शरणस्थलादि चतुर्विध
स्थल प्रसङ्गोनाम त्रयोदश परिच्छेदः परिसमाप्तः ॥१३ ॥

---

चतुर्दशः परिच्छेदः

अगस्त्य उवाच

तामसत्याग सम्बन्धान्निर्देशाच्छीलतस्तथा ।
शरणाख्यस्य भूयोस्यकथमैक्यनिरूपणम् ॥ १४.१ ॥

श्री रेणुक उवाच

प्राणलिङ्गादियोगेन सुखातिशयमेयिवान् ।
शरणाख्यः शिवेनैक्यभावनादैक्यवान् भवेत् ॥ १४.२ ॥
ऐक्यस्थलमिदं प्रोक्तं चतुर्धा मुनिपुङ्गव ।
ऐक्यमाचारसम्पत्ति रेक भाजनमेवच ।
सहभाजनमित्येषां क्रमाल्लक्षणमुच्यते ॥ १४.३ ॥

४१. ऐक्यस्थलं

विषयानन्दकणिका निःस्पृहोनिर्मलाशयः ।
शिवानन्दमहासिन्धौ मज्जवादैक्यमुच्यते ॥ १४.४ ॥
निर्धूतमलसम्बन्धो निष्कलङ्कमनोगतः ।
शिवोहमिति भावेन निरूढो हि शिवैकतां ॥ १४.५ ॥
शिवेनैक्यं समापन्नश्चिदानन्दस्वरूपिणा ।
न पश्यति जगज्जालं माया कल्पित वैभवं ॥ १४.६ ॥
ब्रह्माण्डबुद्बुदोद्भेदविजृम्भी तत्त्ववीचिमान् ।
मया सिन्धुर्लयं याति शिवैक्यबडवानले ॥ १४.७ ॥
मायाशक्ति तिरोधानाच्छिवे भेदविकल्पना ।
आत्मनस्तद्विनाशेतुना द्वैतात् किञ्चिदिष्यते ॥ १४.८ ॥
पशुत्वं च पतित्वं च मायामोहविकल्पितं ।
तस्मिन् प्रलयामापन्ने कः पशुः को नुवा पतिः ॥ १४.९ ॥
घोरसंसार सर्पस्य भेदवल्मीकशायिनः ।


From http://sanskritdocuments.org

बाधकं परमाद्वैत भावना परमौषधं ॥१४.१०॥
भेदबुद्धि समुत्पन्न महासंसारसागरं ।
अद्वैत बुद्धि पोतेन समुत्तरति देशिकः ॥१४.११॥
अज्ञानतिमिरोद्रिक्ता कामरक्षःक्रियाकरी ।
संसारकालरात्रिस्तु नश्येददैत भानुना ॥१४.१२॥
तस्मादद्वैतभावस्य सदृशो नास्ति योगिनां ।
उपायो घोरसंसार महातापनिवृत्तये ॥१४.१३॥
अद्वैतभावनाजातं क्षणमात्रेपि यत्सुखं ।
तत्सुखं कोटिवर्षैस्तु प्राप्यते नैव भोगिभिः ॥१४.१४॥
चित्तवृत्ति समालीन जगतेः शिवयोगिनः ।
शिवानन्द परिस्फूर्तिर्मुक्ति रित्यभिदीयते ॥१४.१५॥

४२. आचार सम्पत्ति स्थलं

शिवैकभावनापन्नशिवत्वो देहवानपि ।
देशिकोहिनलिप्येत स्वाचारैः सूतकादिभिः ॥१४.१६॥
शिवाद्वैत परिज्ञाने स्थिरे सति मनस्विनां ।
कर्मणा किं नु भाव्यं स्यादकृतेन वा ॥१४.१७॥
शम्भोरेकत्वभावेस सर्वत्र समदर्शनः ।
कुर्वन्नपि महाकर्म न तत्फलमवाप्नु यात् ॥१४.१८॥
सुकृती दुष्कृती वापि ब्राह्मणोवान्त्यजोपिवा ।
शिवैकभावयुक्तानां सदृशो भवति ध्रुवं ॥१४.१९॥
वर्णाश्रमसदाचारैर्ज्ञानिनां किं प्रयोजनं ।
लौकिकस्तु सदाचारः फलाभावेपि भाव्यते ॥१४.२०॥
निर्धग्धकर्म बीजस्य निर्मलज्ञान वह्निना ।
देहिवद्भासमानस्य देहयात्रा तुलौकिकी ॥१४.२१॥
शिवज्ञान समापन्न स्थिर वैराग्य लक्षणः ।
स्वकर्मणा नलिप्येत पद्मपत्रमिवां भसा ॥१४.२२॥
गच्छंस्तिष्ठन् स्वपन्वापि जाग्रद्वापि महामतिः ।
शिवज्ञान समायोगाच्छिवपूजापरः सदा ॥१४.२३॥
यद्यत्पश्यति सामोदं वस्तुलोकेषु देशिकः ।
शिवदर्शन सम्पत्तिस्तत्र तत्र महात्मनः ॥१४.२४॥
यद्यच्छिन्तयते योगी मनसा शुद्धभावनः ।
तत्तच्छिवमयत्वेन शिवध्यानमुदाहृतं ॥१४.२५॥
यत्किञ्चिद्भाषितं लोके स्वेच्छया शिवयोगिना ।
शिवस्तोत्रमिदं सर्वं यस्मात्सर्वात्मकः शिवः ॥१४.२६॥
या या चेष्टा समुत्पन्ना जायते शिवयोगिनां ।
सासा पूजा महेशस्य सर्वदा तद्गतात्मनां ॥१४.२७॥



From http://sanskritdocuments.org

४३. एकभाजनस्थलं

विश्वं शिवमयं चेति सदा भावयतो धिया ।
शवैकभाजनात्मत्वादेक बाजसमुच्चते ॥ १४.२८ ॥
स्वस्यसर्वस्य लोकस्य शिवस्याद्वैतदर्शनात् ।
एकभाजन योगेन प्रसादैक्य मतिर्भवेत् ॥ १४.२९ ॥
शिवे विश्वमिदं सर्वं शिवः सर्वत्र भासते ।
आधाराधेय भावेन शिवस्य जगतः स्थिति ॥ १४.३० ॥
चिदेक भाजनं यस्य चित्तवृत्ति शिवात्मिका ।
नान्यत्तस्य किमेतेन मायामूलेन वसुना ॥ १४.३१ ॥
चित् प्रकाशयते विश्वं तद्बिना वस्तु नास्ति हि ।
चिदेकनिष्ठचित्तानां किं मायापरिकल्पितैः ॥ १४.३२ ॥
वृत्ति शून्ये स्वहृदये शिवलीने निराकुले ।
यः सदा रमते योगी समुक्तो नात्र संशयः ॥ १४.३३ ॥

४४. सहज भाजनस्थलं

गुरोः शिवस्य शिष्यस्य स्वस्वरूपतया स्मृतिः ।
सहभाजनमाख्यातं सर्वग्रासात्म भावतः ॥ १४.३४ ॥
शिवं विश्वं गुरुं साक्षाद्योजय्येन्नित्यमात्मनि ।
एकत्वेन चिदाकारे तदिदं सहभाजनं ॥ १४.३५ ॥
अहं शिवो गुरुश्चैष जगदेतच्चराचरं ।
अहं चेति मतिर्यस्य नास्त्यसौ विश्वभाजकः ॥ १४.३६ ॥
अहं भृत्यः शिवः स्वामी शिष्योहं गुरुरेषवै ।
इति यस्य मतिर्नास्ति स चाद्वैतपदे स्थितः ॥ १४.३७ ॥
पराहन्तामये स्वात्मपावके विश्वभासके ।
इदन्ता हव्यहोमेन विश्वहोमिति कथ्यते ॥ १४.३८ ॥
अहं शिवो गुरुश्चाहमहं विश्वं चराचरं ।
ययाविज्ञायते सम्यक् पूर्णाहं तेतिसास्मृता ॥ १४.३९ ॥
आधारवह्नौ चिद्रूपे भेदजातं जगद्धविः ।
जुहोति ज्ञानजुह्वायः सज्ञेयो विश्वहव्यभुक् ॥ १४.४० ॥
चिदाकारे पराकाशे परमानन्द भान्वति ।
विलीन चित्तवृत्तीनां का वा विश्वक्रमस्थितिः ॥ १४.४१ ॥
निरस्त विश्वसम्बाधे निष्कलङ्के चिदम्बरे ।
भावयेल्लीन मात्मानं सामरस्य स्वभावतः ॥ १४.४२ ॥
सैषा विद्या पराज्ञेया सत्तानन्द प्रकाशिनी ।
मुक्तिरित्युच्चते सद्भिर्जगन्मोहनिवर्तिनी ॥ १४.४३ ॥
भक्तादिनामा परधर्मयोगात् प्राप्तैकभावः परमाद्भुतेन ।
शिवेन चिद्व्योममयेन साक्षा न्मोक्षश्रियो भाजनतामुपैति ॥ १४.४४ ॥



From http://sanskritdocuments.org

इति श्री सिद्धान्त शिखामणौ ऐक्यस्थले ऐक्यस्थलादि चतुर्विध स्थल प्रसङ्गोनाम चतुर्दश परिच्छेदः परिसमाप्तः ॥१४॥

---

पञ्चदश परिच्छेदः

श्री रेणुक उवाच

षट् स्थलोक्त सदाचार सम्पन्नस्य यथाक्रमं ।
लिङ्गस्थलानि कथ्यन्ते जीवन्मुक्ति पराणि च ॥१५.१॥

अगस्त्य उवाच

भक्ताद्यैक्यावसानानि षडुक्तानि स्थलानि च ।
लिङ्गस्थलानि कानीह कथ्यन्ते कति वापुनः ॥१५.२॥

श्री रेणुक उवाच

गुर्वादिज्ञानशून्यान्ता भक्तादि स्थलसंश्रिताः ।
स्थलभेदाः प्रकीर्त्यन्ते पञ्चाशत्सप्त चाधुना ॥१५.३॥
अदौ नवस्थलानीह भक्तस्थलसमाश्रयात् ।
कथ्यन्ते गुणसारेण वामान्येषां पृथक् श्रुणु ॥१५.४॥
दीक्षागुरुस्थलं पूर्वं ततः शिक्षागुरुस्थलं ।
प्रज्ञागुरुस्थलं चाथक्रिया लिङ्गस्थलं ततः ॥१५.५॥
भावलिङ्गस्थलं चाथ ज्ञानलिङ्गस्थलं ततः ।
स्वयं चरं परं चेति तेषां लक्षणमुच्यते ॥१५.६॥

१. दीक्षागुरुस्थलं

दीयते परमं ज्ञानं क्षीयते पाशबन्धनं ।
यया दीक्षेति सा तस्यां गुरुर्दीक्षागुरुस्मृतः ॥१५.७॥
गुणातीतं गवर्णं च रूपातीतं रुवर्णकं ।
गुणातीतमरूपञ्चयोदद्यात् स गुरुःस्मृतः ॥१५.८॥
अचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि ।
स्वयमाचरते यस्तु स आचार्य इति स्मृतः ॥१५.९॥
षडध्वातीतयोगेन यतते यस्तु देशिकः ।
मायाब्धि तरणोपाय हेतुर्विश्वगुरुः स्मृतः ॥१५.१०॥
अखण्डं येन चैतन्यं व्यज्यते सर्ववस्तुषु ।
आत्मयोगप्रभावेण स गुरुर्विश्व भासकः ॥१५.११॥

२. शिक्षागुरुस्थलं

दीक्षागुरुरसौ शिक्षाहेतुः शिष्यस्य बोधकः ।
प्रश्नोत्तरप्रवक्ता च शिक्षा गुरुरितीर्यते ॥१५.१२॥
बोधकोयं समाख्यातो बोध्यमेतदिति स्फुटं ।
शिष्या नियुज्यते येन स शिक्षा गुरुरुच्यते ॥१५.१३॥



From http://sanskritdocuments.org

संसारतिमिरो न्माथशरच्छन्द्रमरीचयः ।
वाचो यस्य प्रवर्तन्ते तमाचार्यं प्रचक्षते ॥ १५.१४ ॥
ददाति यः पतिज्ञानं जगन्मायानिवर्तकं ।
अद्वैतवासनोपायं तमाचार्यवरं विदुः ॥ १५.१५ ॥
पूर्वपक्षं समादाय जगद्भेद विकल्पनं ।
अद्वैतकृतसिद्धान्तो गुरुरेष गुणाधिकः ॥ १५.१६ ॥
सन्देहवनसन्दोह समुच्छेदकुठारिका ।
यत्सूक्तिधारा विमला सगुरूणां शिखामणिः ॥ १५.१७ ॥
यत्सूक्ति दर्पणाभोगे निर्मलेदृश्यते सदा ।
मोक्षश्रीर्बिम्बरूपेण स गुरुर्भवतारकः ॥ १५.१८ ॥
शिष्याणां हृदयालेख्यं प्रद्योत यतियःस्वयं ।
ज्ञानदीपिकया तेन गुरुणा कः समोभवेत् ॥ १५.१९ ॥
परमाद्वैत विज्ञानपरमौषधदानतः ।
संसाररोगनिर्माथी देशिकः केन लभ्यते ॥ १५.२० ॥

३. ज्ञानगुरुस्थलं

उपदेष्टोपदेश्यानां संशयच्छेदकारकः ।
सम्यग् ज्ञानप्रदः साक्षादेष ज्ञानगुरुः स्मृतः ॥ १५.२१ ॥
निरस्त विश्वसम्भेदं निर्विकारं चिदम्बरं ।
साक्षात्कारोति यो युक्त्या स ज्ञानगुरुरुच्यते ॥ १५.२२ ॥
कलङ्कवाससौ चन्द्रः क्षयवृद्धिपरिप्लुतः ।
निष्कलङ्कः स्थितो ज्ञानचन्द्रमा न विकारवान् ॥ १५.२३ ॥
पार्श्वस्थं तिमिरं हन्ति प्रदीपो मणि निर्मितः ।
सर्वगामि तमोहन्ति बोधदीपो निरङ्कुशः ॥ १५.२४ ॥
सर्वार्थसाधक ज्ञानविशेषादेशतत्परः ।
ज्ञानाचार्यः समस्तनामानुग्रहकरः शिवः ॥ १५.२५ ॥
कटाक्ष चन्द्रमा यस्य ज्ञानसागर वर्धनः ।
संसार तिमिरच्छेदि विभुर्देशिक भास्करः ॥ १५.२६ ॥
बहिस्तिमिरविच्छेत्ता भानुरेषा प्रकीर्तितः ।
बहिरन्तस्त मच्छेदि विभुर्देशिकभास्करः ॥ १५.२७ ॥
कटाक्षलेशमात्रेण विना ध्यानादिकल्पनं ।
शिवत्वं भावयेद्यत्र न वेधः शाम्भवो मतः ॥ १५.२८ ॥
शिववेधकरे ज्ञाने दत्ते येन सुनिर्मले ।
जीवन्मुक्तो भवेच्छिष्यः स गुरुर् ज्ञानसागरः ॥ १५.२९ ॥

४. क्रियालिङ्गस्थलं

गुरोर्विज्ञान योगेन क्रिया यत्र विलीयते ।
तत्क्रियालिङ्ग माख्यातं सर्वैरागम पारगैः ॥ १५.३० ॥


From http://sanskritdocuments.org

परानन्दं चिदाकारं परब्रह्मैवकेवलं ।
लिङ्गसद्रूपतापन्नं लक्ष्यते विश्वसिद्धये ॥ १५.३१॥
लिङ्गमेव परञ्ज्योतिर्भवति ब्रह्म केवलं ।
तस्मात्तत्पूजनादेव सर्वकर्मफलोदयः ॥ १५.३२॥
परित्यज्य क्रियाः सर्वालिङ्गपूजैक तत्पराः ।
वर्तन्ते योगिनः सर्वे तस्माल्लिङ्गं विशिष्यते ॥ १५.३३॥
यज्ञादयः क्रियाः सर्वा लिङ्गपूजांशसम्मिताः ।
इति यात्पूज्यते सिद्धैत्क्रियालिङ्गमुच्यते ॥ १५.३४॥
किं यज्ञैरग्नि होत्राद्यैः किं तपोभिश्च दुश्चरैः ।
लिङ्गार्चनर्यतिर्यस्य स सिद्धः सर्वकर्मसु ॥ १५.३५॥
ब्रह्मा विष्ण्वादयः सर्वे विबुधा लिङ्गमाश्रिताः ।
सिद्धाः स्वस्वपदे भान्ति जगत्तन्त्राधिकारिणः ॥ १५.३६॥

५. भावलिङ्गस्थलं

क्रिया यथालयं प्राप्ता तथा भावोपि लीयते ।
यत्र तद्देशिकैरुक्तं भावलिङ्गमितिस्फुटं ॥ १५.३७॥
भावेन गृह्यते देवो भगवान् परमः शिवः ।
किन्तेन क्रियते तस्य नित्यपूर्णो हि स स्मृतः ॥ १५.३८॥
अखण्ड परमानन्द बोधरूपः परः शिवः ।
भक्तानामुपचारेण भावयोगात् प्रसीदति ॥ १५.३९॥
मृच्छिल्लाविहिताल्लिङ्गाद्भाव लिङ्गं विशिष्यते ।
निरस्त सर्वदोषत्वाद् ज्ञानमार्ग प्रवेशनात् ॥ १५.४०॥
विहाय बाह्यलिङ्गानि चिल्लिङ्गं मनसि स्मर ।
पूजयेद्भावपुष्पैर्यो भावलिङ्गीति कद्यते ॥ १५.४१॥
मूलाधारेऽथवा चित्ते भ्रूमध्ये वा सुनिर्मलं ।
दीपाङ्कुरण्यजन् लिङ्गं भावद्रव्यैःसयोगवा ॥ १५.४२॥
स्वानुभूति प्रमाणेन ज्योतिर्लिङ्गेन सण्युतः ।
शिलामृद्दारुसम्भूतं न लिङ्गं पूजयत्यसौ ॥ १५.४३॥
क्रियरूपातु या पूजा साज्ञेयास्वल्पसम्विदां ।
अन्तरा भावपूजा तु शिवस्य ज्ञानिनां मता ॥ १५.४४॥

६. ज्ञानलिङ्गस्थलं

तद्भावज्ञापकं ज्ञानं लयं यत्र समश्नुते ।
तज् ज्ञानलिङ्गमाख्यातं शिवतत्त्वार्थकोविदैः ॥ १५.४५॥
त्रिमूर्ति भेदनिर्मुक्तं त्रिगुणातीत वैभवं ।
ब्रह्म यद्बोध्यते तत्तु ज्ञानलिङ्ग मुदाहृतं ॥ १५.४६॥
स्थूले क्रियासमापत्तिः सूक्ष्मे भावस्य सम्भवः ।
स्थूलसूक्ष्म पदातीते ज्ञानमेव परात्मनि ॥ १५.४७॥



From http://sanskritdocuments.org

कल्पितानि हि रूपाणि स्थूलानि परमात्मनः ।
सूक्ष्माण्यपिच तैः किम्वा परबोधं समाचरेत् ॥ १५.४८ ॥
परात्परं तु यद्ब्रह्म परमानन्दलक्षणं ।
शिवाख्यं ज्ञायते येन ज्ञानलिङ्गी स कथ्यते ॥ १५.४९ ॥
बाह्यक्रियां परित्यज्य चिन्तामपि च मानसीं ।
अखण्ड ज्ञानरूपत्वं यो भजेन्मुक्त एव सः ॥ १५.५० ॥

७. स्वस्थलं

तद्भावज्ञापकं ज्ञानं यत्रज्ञाने लयं व्रजेत् ।
तद्धानेष समाख्यातः स्वाभिदानो मनीषिभिः ॥ १५.५१ ॥
स्वच्छन्दा चारसन्तुष्टो ज्योतिर्लिङ्गपरायणः ।
आत्मस्थसकलाकारः स्वाभिधो मुनिसत्तमः ॥ १५.५२ ॥
निर्ममो निरहङ्कारो निरस्तक्लेशपञ्चकः ।
भिक्षाशी समबुद्धिश्च मुक्तप्रायो मुनिर्भवेत् ॥ १५.५३ ॥
यदृच्छालाभसन्तुष्टो भस्मनिष्टो जितेन्द्रियः ।
समवृत्ति र्भवेद्योगि भिक्षुके वा नृपेथवा ॥ १५.५४ ॥
पश्यन् सर्वाणि भूतानि संसारस्थानि सर्वशः ।
स्मयमानः परानन्दे लीनात्मा वर्तते सुधीः ॥ १५.५५ ॥
ध्यानं शैवं तथा ज्ञानं भिक्षा चैकान्तशीलता ।
य तेश्चत्वारि कर्माणि न पञ्चममि हेष्यते ॥ १५.५६ ॥

८. चर्मस्थलं

स्वरूपज्ञानसम्पन्नो ध्वस्ताहम्ममताकृतिः ।
स्वयमेव स्वयं भूत्वा चरतीति चराभिदः ॥ १५.५७ ॥
कामक्रोधादिनिर्मुक्तः शान्तिदान्तिसमन्वितः ।
समबुद्ध्या चरेद्योगी सर्वत्र शिवबुद्धिमान् ॥ १५.५८ ॥
इदं मुख्यमिदं हीनमिति चिन्तामकल्पयन् ।
सर्वत्र सञ्चरेद्योगी सर्वं ब्रह्मेति भावयन् ॥ १५.५९ ॥
न सम्मानेषु सम्प्रीतिं नावमानेषु च व्यथां ।
कुर्वाणः सञ्चरेद्योगी कूटस्थे स्वात्मनि स्थितः ॥ १५.६० ॥
अप्राकृतगुणैः स्वीयैः सर्वं विस्मापयन् जनं ।
अद्वैतपरमानन्दमुदितो देहिवच्चरेत् ॥ १५.६१ ॥
नप्रपञ्चे नदेहे च नधर्मे नच दुष्कृते ।
गत वैषम्यधीर्धीरो यतिश्चरति देहिवत् ॥ १५.६२ ॥
प्राकृतैश्वर्य सम्पत्ति पराङ्मुखमनःस्थितिः ।
चिदानन्द निजात्मस्थो मोदते मुनिपुङ्गवः ॥ १५.६३ ॥

९. परस्थलं

स्वयमेव स्वयं भूत्वा चरतः स्वस्वरूपतः ।



From http://sanskritdocuments.org

परं ना स्तीति बोधन्य परत्वमभिधीयते ॥ १५.६४॥
स्वतन्त्रः सर्वकृत्येषु स्वपरत्वेन भावितः ।
तृणीकुर्वन् जगज्जालं वर्तते शिवयोगिराट् ॥ १५.६५॥
वर्णाश्रमसदाचार मार्गनिष्ठापराङ्मुखः ।
सर्वोत्कृष्टं स्वमात्मानां पश्यन् योगीतु मोदते ॥ १५.६६॥
विश्वातीतं परं ब्रह्म शिवाख्यं चित्स्वरूपकं ।
तदेवाहमिति ज्ञानी सर्वोत्कृष्टः स उच्यते ॥ १५.६७॥
अचलं धृवमात्मासमनुपश्यन्नि रन्तरं ।
निरस्त विश्वविभ्रान्ति र्जीवन्मुक्तो भवेन्मुनिः ॥ १५.६८॥
ब्रह्माद्याः किं नु कुर्वन्ति देवताः कर्ममार्गगाः ।
कर्मातीत पदस्थस्य स्वयं ब्रह्मस्वरूपिणः ॥ १५.६९॥
स्वेच्छया नञ्चरन् योगी विमुञ्चन् देहमानितां ।
दर्शनैः स्पर्शनैः सर्वानज्ञानपि विमोचयत् ॥ १५.७०॥
नित्ये निर्मलभावने निरुपमे निर्धूतविश्वभ्रमे
सत्तानन्द चिदात्मके परशिवे साम्यं गतः सण्यमी ।
प्रध्वस्ताश्रमवर्णधर्मनिगलः स्वच्छन्दनं चारवान्
देहेप्यद्भुत वैभवो विजयते जीवन्विमुक्तः सुधीः ॥ १५.७१॥
इति श्री सिद्धान्त शिखामणौ लिङ्गस्थले दीक्षा गुरुस्थलादि नवविध
स्थल प्रसङ्गोनाम पञ्चदश परिच्छेदः परिसमाप्तः ॥१५॥

---

षोडशपरिच्छेदः

अगस्त्य उवाच

स्थलानां नवकं प्रोक्तं भक्तस्थलसमाश्रयं ।
महेश्वरस्थले सिद्धं स्थलभेदं निरूपय ॥ १६.१॥

श्री रेणुक उवाच

माहेश्वरस्थले सन्ति स्थलानि नव तापस ।
क्रियागमस्थलं पूर्वं ततो भावागमस्थलं ॥ १६.२॥
ज्ञानागमस्थलं चाथ सकाय स्थलमीरितं ।
ततोकायस्थलं प्रोक्तं परकायस्थलं ततः ॥ १६.३॥
धर्माचारस्थलं चाथभावाचार स्थलं ततः ।
ज्ञानाचारस्थलं चेत क्रमादेषां भिदोच्यते ॥ १६.४॥

१०. क्रियागमस्थलं

शिवो हि परमः साक्षात् पूजा तस्य क्रियोच्यते ।
तत्परा आगमा यस्मात्त दुक्तोयं क्रियागमः ॥ १६.५॥
प्रकाशते यथानाग्नि ररण्यां मथनं विना ।


From http://sanskritdocuments.org

क्रियां विना तथान्तःस्थोन प्रकाशो भवेच्छिवः ॥ १६.६ ॥
न यथा विधिलोपः स्याद्यथा देवः प्रसीदति ।
यथागमः प्रमाणं स्यात्तथा कर्मसमाचरेत् ॥ १६.७ ॥
विधिः शिवनियोगोयं तस्माद्विहितकर्मणि ।
शिवाराधनबुद्ध्यैव निरतः स्याद्विचक्षणः ॥ १६.८ ॥
गुरोरादेश मासाद्य पूजयेत्परमेश्वरं ।
पूजिते परमेशाने पूजिताः सर्वदेवताः ॥ १६.९ ॥
सदा शिवार्चनोपायसामाग्रीव्यग्रमानसः ।
शिवयोगरतो योगी मुच्यते नात्र संशयः ॥ १६.१० ॥
अन्धपङ्गुवदन्योन्य सापेक्षे ज्ञानकर्मणि ।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्व यमाचरेत् ॥ १६.११ ॥
ज्ञाने सिद्धे पि विदुषां कर्मापि विनियुज्यते ।
फलाभिसन्धिरहितं तस्मात्कर्म न सन्त्यजेत् ॥ १६.१२ ॥
आचार एव सर्वेषामलङ्काराय कल्पते ।
आचारहीनः पुरुषो लोके भवति निन्दितः ॥ १६.१३ ॥
ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदा देह पातनं ॥ १६.१४ ॥

११. भावागमस्थलं

भावचिह्नानि विदुषो यानि सन्ति विरागिणः ।
तानि भावागमत्वेन वर्तन्ते सर्वदेहिनां ॥ १६.१५ ॥
शिवोहमिति भावोहि शिवतापत्ति कारणं ।
न ज्ञानमात्रं नाचारो भावयुक्तः शिवोभवेत् ॥ १६.१६ ॥
ज्ञानं वस्तु परिच्छेदो ध्यानं तद्भावकारणं ।
तस्मात् ज्ञाते महादेवे ध्यानयुक्तोभवेत्सुधीः ॥ १६.१७ ॥
अन्तर्बहिश्च सर्वत्र परिपूर्णं महेश्वरं ।
भावयेत्परमानन्द लब्धये पण्डितोत्तमः ॥ १६.१८ ॥
अर्थहीना यथा वाणी पतिहीना यथा सती ।
श्रुतिहीना यथा बुद्धि र्भावहीना तथा क्रिया ॥ १६.१९ ॥
चक्षुर्हीनो यथारूपं न किञ्चि द्वीक्षुतं क्षमः ।
भावहीनस्तथा योगी न शिवं द्रष्टुमीश्वरः ॥ १६.२० ॥
भावशुद्धेन मनसा पूजयेत्परमेश्वरं ।
भावहीनां न गृह्णाति पूजां सुमहतीमपि ॥ १६.२१ ॥
नैरन्तर्येण सम्पन्ने भावे ध्यातुं शिवम्प्रति ।
तद्भावो जायते यद्वत् कीटी भ्रमरचिन्तनात् ॥ १६.२२ ॥
निष्कलङ्कं निराकारं परब्रह्म शिवाभिदं ।
निध्याततु मनमर्थोपि तद्विभूतिं विभावयेत् ॥ १६.२३ ॥


From http://sanskritdocuments.org

## १२. ज्ञानागमस्थलं

परस्य ज्ञानचिह्नानि यानि नन्ति शरीरिणां ।
तानि ज्ञानागमत्वेन प्रवर्तन्ते विमुक्तये ॥ १६.२४ ॥
भावेन किं फलं पुंसां कर्मणा वा किमिष्यते ।
भावकर्म समायुक्तं ज्ञानमेव विमुक्ति दं ॥ १६.२५ ॥
केवलं कर्ममात्रेण जन्मकोटि शतैरपि ।
नात्मनं जायते मुक्तिर्णानं मुक्तेर्हि कारणं ॥ १६.२६ ॥
ज्ञानहीनां सदा कर्म पुंसां संसारकारणं ।
तदेव ज्ञानयोगेन संसारविनिवर्तकं ॥ १६.२७ ॥
फलं क्रियवतां पुंसां स्वर्गाद्यं नश्वरं यतः ।
तस्मात् स्थायीफल प्राप्त्यै ज्ञानमेव समभ्यसेत् ॥ १६.२८ ॥
शास्त्राभ्यासादियत्नेन सद्गुरोरुपदेशतः ।
ज्ञानमेव समभ्यस्येत् किमन्येन प्रयोजनं ॥ १६.२९ ॥
ज्ञानं परशिवाद्वैतपरिपाक विनिश्चयः ।
येन संसार सम्बन्ध विनिवृत्तिर्भवेत् सतां ॥ १६.३० ॥
शिवात्मक मिदं सर्वं शिवादन्यन्न विद्यते ।
शिवोहमति या बुद्धिस्त देव ज्ञानमुत्तमं ॥ १६.३१ ॥
अन्धो यधा पुरःस्थानि वस्तूनि नहि पश्यति ।
ज्ञानहीनस्तथा देहि नात्मस्थं वीक्षते शिवं ॥ १६.३२ ॥
शिवस्य दर्शनात्पुंसां जन्मरोगनिवर्तनं ।
शिवदर्शनमप्याहुः सुलभं ज्ञानचक्षुषां ॥ १६.३३ ॥
दीपं विना यथा गेहे नान्धकारो निवर्तते ।
ज्ञानं विना तथा चित्ते मोहोपि ननिवर्तते ॥ १६.३४ ॥

## १३. सकायस्थलं

परन्य या तनुर्णेया देहकर्माभिमानिनः ।
तयासकायोलोकोयन्तदात्मत्वनिरूपणात् ॥ १६.३५ ॥
कायं विना समस्तानां न क्रिया न च भावना ।
न ज्ञानं यत्ततो योगी कायवानेन सञ्चरेत् ॥ १६.३६ ॥
शिवैक्यज्ञानयुक्तन्य योगिनोपि महात्मनः ।
काययोगेन सिद्ध्यन्ति भोगमोक्षादयः सदा ॥ १६.३७ ॥
काष्ठं विना यथा वह्निर्जायते न प्रकाशवान् ।
मूर्तिम्विना तथायोगी नात्मतत्त्व प्रकाशवान् ॥ १६.३८ ॥
मूर्त्यात्म नैव देवस्य यथा पूज्यत्वकल्पना ।
तथा देहात्मा नैवास्य पूज्यत्वं परयोगिनः ॥ १६.३९ ॥
निष्कलोहि महादेवः परिपूर्णः सदाशिवः ।
जगसृष्ट्यादि संसिद्ध्यै मूर्ति मानेव भासते ॥ १६.४० ॥



From http://sanskritdocuments.org

ब्रह्माद्या देवताः सर्वा मुनयोपि मुमुक्षवः ।
कायवन्तो हि कुर्वन्ति तपः सर्वार्थ साधकं ॥ १६.४१॥
तपोहि मूलं सर्वासां सिद्धीनां यज्जगत्त्रये ।
तपस्तत्कायमूलं हितस्मात्कायं न सन्त्यजेत् ॥ १६.४२॥

१४. अकायस्थलं

औपचारिक देहित्वाज्जग दात्मत्व भावनात् ।
माया सम्बन्धराहित्याद कायो हिपरःस्मृतः ॥ १६.४३॥
परस्य देहयोगेपि न देहाश्रयविक्रया ।
शिवस्येव यतस्तास्मादकायो यं प्रकीर्तितः ॥ १६.४४॥
परलिङ्गे विलीनस्य परमानन्द चिन्मये ।
कुतो देहेन सम्बन्धो देहिवद्भावनं भ्रमः ॥ १६.४५॥
देहाभिमानहीनस्य शिवभावे स्थिरात्मनः ।
जगदेतच्छरीरं स्याद्देहेनैकेन का व्यथा ॥ १६.४६॥
शिवज्ञानैक निष्ठस्य नाहङ्कारभवो भ्रमः ।
न चेन्द्रियभवं दुःखं त्यक्त देहाभिमानिनः ॥ १६.४७॥
न मनुष्यो न देहोहं न यक्षो नैव राक्षसः ।
शिवोहमिति यो बुद्ध्यात्तस्थ किन्देह कर्मणा ॥ १६.४८॥

१५. परकाय स्थलं

वशीकृतत्वात् प्रकृतेर्मायामार्गातिवर्तनात् ।
परकायोयमाख्यतः सत्यज्ञान सुखात्मकः ॥ १६.४९॥
परब्रह्म वपुर्यस्य प्रबोधानन्दभासुरं ।
प्राकृतेन किमेतेन शरीरेणास्य जायते ॥ १६.५०॥
सम्यग् ज्ञानाग्नि सन्दग्ध जन्मबीजकलेवरः ।
शिवतत्त्वावलम्बी यः परकायः स उच्यते ॥ १६.५१॥
इन्द्रियाणी मनोवृत्तिर्वासनाः कर्मसम्भवाः ।
यत्र यान्ति लयन्तेन सकायोयं परात्मना ॥ १६.५२॥
पराहन्तामनुप्राप्य पश्येद्विश्वं चिदात्मकं ।
न देहीतिभ्रमस्तस्य निश्चिता हि शिवात्मता ॥ १६.५३॥
स्वस्वरूपं शिवाकारं ज्योतिस्साक्षाद्विचिन्तयन् ।
देहवानपि निर्देहो जीवन्मुक्तोहि साधकः ॥ १६.५४॥
देहस्तिष्ठतु वा यातु योगिनः स्वात्मभोदिनः ।
जीवन्मुक्तिर्भवेत् सद्यश्चिदानन्दप्रकाशिनी ॥ १६.५५॥
आत्मज्ञानावसानं हि संसारपरिपीडनं ।
सूर्योदयेपि किं लोकस्तिमिरेणोपरुद्ध्यते ॥ १६.५६॥
देहाभिमान निर्मुक्तः कुलातीतपदाश्रयः ।
कथं याति परिच्छेदं शरीरेषु महाबुधः ॥ १६.५७॥


From http://sanskritdocuments.org

१६. धर्माचारस्थलं

तस्यैव परकायस्य धर्माचारो य इष्यते ।
न धर्मः सर्वलोकानामुपकाराय कल्पते ॥ १६.५८ ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा ।
दानं पूजा जपो ध्यानमिति धर्मस्य सङ्ग्रहः ॥ १६.५९ ॥
शिवेन विहितो यस्मादाग मैर्धर्म सङ्ग्रहः ।
तस्मात्त माचरन् विद्वान् तत्प्रसादाय कल्पते ॥ १६.६० ॥
अधर्मं नस्पृशेत् किञ्चिद्विहितं धर्ममाचरेत् ।
तं च काम विनिर्मुक्तं तमपि ज्ञानपूर्वकं ॥ १६.६१ ॥
आत्म वत्सर्वभूतानि सम्पश्येद्योग वित्तमः ।
जगदेकात्मता भावान्निग्रहादि विरोधतः ॥ १६.६२ ॥
एक एव शिवस्साक्षाज्जगदेतदिति स्फुटं ।
पश्यतः किं न जायेत ममकारो हि विभ्रमः ॥ १६.६३ ॥
धर्म एव समस्तानां यतः संसिद्धि कारणं ।
निःस्पृहोपि महायोगी धर्ममार्गम्हि नत्यजेत् ॥ १६.६४ ॥
ज्ञानामृतेन तृप्तोपि योगि धर्मं न सन्त्यजेत् ।
आचारं महतां दृष्ट्वा प्रवर्तं तेहि लौकिकाः ॥ १६.६५ ॥
सदाचारप्रियः शम्भुः सदाचारेण पूज्यते ।
सदाचारं विना तस्य प्रसादो नैव जायते ॥ १६.६६ ॥

१७. भावाचारस्थलं

भाव एवान्य सर्वेषां भावाचरः प्रकीर्तितः ।
भावो मानस चेष्टात्मा परिपूर्णः शिवाश्रयः ॥ १६.६७ ॥
भावनाविहितं कर्म पावनादपि पावनं ।
तस्माद्भावनया युक्तं परधर्मं समाचरेत् ॥ १६.६८ ॥
भावेनहि मनश्शुद्धिर्भावात् सिद्धिश्च कर्मणां ।
इतिसञ्चित्य मनसा योगी भावं न सन्त्यजत् ॥ १६.६९ ॥
शिवभावनया सर्वं नित्यनैमित्ति कादिकं ।
कुर्वन्नपि महायोगी गुणदोषैर्न बाध्यते ॥ १६.७० ॥
अन्तःप्रकाशमानस्य सम्वित्सूर्यस्य सन्ततं ।
भावेन यदुपस्थानं तत् सन्ध्यावन्दनं विदुः ॥ १६.७१ ॥
आत्मज्योतिषु सर्वेषां विषयाणां समर्पणं ।
अन्तर्मुखेन भावेन होमकर्मेति गीयते ॥ १६.७२ ॥
भावयेत् सर्वकर्माणि नित्यनैमित्ति कानि च ।
शिवप्रीतिकराण्येव सङ्गराहित्यसिद्धये ॥ १६.७३ ॥
शिवे निवेश्य सकलं कार्याकार्यं विवेकतः ।
वर्तते यो महाभागः ननङ्गरहितो भवेत् ॥ १६.७४ ॥



From http://sanskritdocuments.org

आत्मानमखिलं वस्तु शिवमानन्दचिन्मयं ।
एकीभावेन सततं सम्पश्यन्नेव पश्यति ॥ १६.७५ ॥

१८. ज्ञानाचरस्थलं

अन्य ज्ञानसमाचारो योगिनः सर्वदेहिनां ।
ज्ञानाचारो यदुक्तो यं ज्ञानाचरः स कथ्यते ॥ १६.७६ ॥
परिपूर्णं महाज्ञानं परतत्त्व प्रकाशकं ।
अवलम्ब्य प्रवृत्तो यो ज्ञानाचारस्स उच्यते ॥ १६.७७ ॥
निर्विकल्पे परे धाम्नि निष्कले शिवनामनि ।
ज्ञानेन योजयन् सर्वं ज्ञानाचारी प्रकीर्तितः ॥ १६.७८ ॥
कर्म ज्ञानाग्निना दग्द्धं न प्ररोहेत् कथञ्चन ।
यदाहुन्संसृतेर्मूलं प्रवाहानुगतं बुधाः ॥ १६.७९ ॥
ज्ञानेन हीनः पुरुषः कर्मणा बध्यते सदा ।
ज्ञानिनः कर्मसङ्कल्पा भवन्ति किल निष्फलाः ॥ १६.८० ॥
ज्ञानं मुक्तिप्रदं प्राप्य गुरुदृष्टिप्रासादतः ।
कः कुर्यात्कर्म कार्पण्ये वाण्छां संसारवर्धने ॥ १६.८१ ॥
शिवाद्वितपरं ज्ञानं ज्ञानमित्युच्यते बुधैः ।
सिद्धेन वाप्यसिद्धेन फलं ज्ञानान्तरेण किं ॥ १६.८२ ॥
निर्मलं हि शिवज्ञानं निःश्रेयसकरं परं ।
रागद्वेषादिकलुषं भूयः संस्मृतिकारणं ॥ १६.८३ ॥
शुद्धाचारः शुद्धभावो विवेकी ज्योतिः पश्यन् सर्वतः शैवमेकम् ।
ज्ञानध्वस्त प्राकृतात्मप्रपञ्चो जीवन्मुक्त श्चेष्टते दिव्ययोगी ॥ १६.८४ ॥
इति श्री सिद्धान्त शिखामणौ लिङ्गस्थलीय महेश्वरस्थल क्रियागम
स्थलादिनवविध स्थल प्रसङ्गोनाम षोडश परिच्छेदः परिसमाप्तः ॥१६ ॥

---

सप्तदश परिच्छेदः

अगस्त्य उवाच

स्थलानि तानि चोक्तानि यानि माहेश्वरस्थले ।
कथय स्थलभेदं मे प्रसादिस्थल संश्रितं ॥ १७.१ ॥

श्रीरेणुक उवाच

स्थलभेदा नवप्रोक्ताः प्रसादिस्थल संश्रिताः ।
कायानुग्रहणं पूर्वमिन्द्रियानुग्रहन्ततः ॥ १७.२ ॥
प्राणानुग्रहणं पश्चात्ततः कायार्पणं मतं ।
करणार्पणमाख्यातं ततो भावार्पणं मतं ॥ १७.३ ॥
शिष्यस्थलं ततः प्रोक्तं शुश्रूषुस्थलमेवच ।
ततः सेव्यस्थलं चैषां क्रमशः श्रुणु लक्षणं ॥ १७.४ ॥



From http://sanskritdocuments.org

१९. कायानुग्रहस्थलं

अनुगृह्णाति यल्लोकान् स्वकायं दर्शयन्न सौ ।
तस्मादेव समाख्यातः कायानुग्रह नामकः ॥ १७.५ ॥
यथा शिवोनुगृह्णाति मूर्तिं माविश्व देहिनः ।
तथा योगी शरीरस्थः सर्वानुग्राहकोभवेत् ॥ १७.६ ॥
शिवः शरीरयोगेपि यथा सङ्गविवर्जितः ।
तथा योगी शरीरस्थो निस्सङ्गो वर्तते सदा ॥ १७.७ ॥
शिवभावनया युक्तः स्थिरया निर्विकल्पया ।
शिवो भवति निर्धूतमायालेश परिप्लवः ॥ १७.८ ॥
गलिताहङ्कृतिग्रन्धिः क्रीडाकल्पित विग्रहः ।
जीवन्मुक्तश्चरेद्योगी देहिवन्नि रुपाधिकः ॥ १७.९ ॥

२०. इन्द्रियानुग्रहस्थलं

दर्शनात् परकायस्य करणानां विवेकतः ।
इन्द्रियानुग्रहः प्रोक्तस्सर्वेषान्तत्त्व वेदिभिः ॥ १७.१० ॥
इन्द्रियाणां समस्तानां स्वार्थेषु सति सङ्गमे ।
रागो वा जायते द्वेषस्तौ योगी परिवर्जयेत् ॥ १७.११ ॥
इन्द्रियाणां बहिर्वृत्तिः प्रपञ्चस्य प्रकाशिनी ।
अन्तः शिवे समावेशो विष्पपञ्चस्य कारणं ॥ १७.१२ ॥
क्षणमन्तः शिवं पश्यन् केवले नैव चेतसा ।
बाह्यार्थानामनुभवं क्षणं कुर्वन् दृगादिभिः ॥ १७.१३ ॥
सर्वेन्द्रियनिरूढोपि सर्वेन्द्रियविहीनवत् ।
शिवाहितमना योगी शिवं पश्यति नापरं ॥ १७.१४ ॥
न जरा मरणं नास्ति न पिपासा न चक्षुधा ।
शिवाहितेन्द्रियस्यास्य निर्मानस्य महात्मनः ॥ १७.१५ ॥
मनोयत्र प्रवर्तेत तत्र सर्वेन्द्रियस्थितिः ।
शिवे मनसि सन्लीने क्वचेन्द्रियविचारणा ॥ १७.१६ ॥
यद्यत्पश्यन् दृशा योगी मनसा चिन्तयत्यपि ।
तत्तत्सर्वं शिवाकारं सम्विद्रूपं प्रकाशते ॥ १७.१७ ॥
शरणैः सहितं प्राणं मनस्याधाय सण्यमी ।
योजयेत्तच्छिवे साक्षाद्यत्र नास्ति जगद्भ्रमः ॥ १७.१८ ॥
सर्वेन्द्रियप्रवृत्या च बहिरन्तः शिवं यजन् ।
स्वच्छन्दचारी सर्वत्र सुखी भवति सण्यमी ॥ १७.१९ ॥

२१. प्राणानुग्रहस्थलं

शिवस्य परकायस्य यत्तात्पर्यावलोकनं ।
स प्राणानुग्रहः प्रोक्तन्सर्वेषां तत्त्वदर्शिभिः ॥ १७.२० ॥
प्राणोयस्य लयं याति शिवे परमकारणे ।


From http://sanskritdocuments.org

कुतस्तस्येन्द्रियस्फूर्तिः कुतः संसारदर्शनं ॥ १७.२१॥
करणेषु निवृत्तेषु स्वार्थसङ्गप्रयत्नतः ।
तैस्समम्प्राणमारोप्य स्वान्तेशान्तमतिः स्वयं ॥ १७.२२॥
शान्तत्वे प्राणवृत्तीनां मनः शाम्यति वृत्तिभिः ।
तच्छान्तौ योगिनां किञ्चिच्छि वादन्यन्न दृश्यते ॥ १७.२३॥
प्राणएव मनुष्याणां देहधारण कारणं ।
तदाधारः शिवः प्रोक्तः सर्वकारणकारणं ॥ १७.२४॥
निराधारः शिवः साक्षात् प्राणस्तेन प्रतिष्ठितः ।
तदाधारः तनुर्जेया जीवो येनैव चेष्टते ॥ १७.२५॥
शिवे प्राणो विलीनोपि योगिनो योगमार्गतः ।
स्वशक्ति वाननायोगाद्धारय त्येव विग्रहं ॥ १७.२६॥
स चाभ्यासवशाद्भूयः सर्वतत्त्वातिवर्तिनि ।
निष्कलङ्के निराकरे निरस्ताशेषविक्लवे ॥ १७.२७॥
चिद्विलासपरिस्फूर्ति परिपूर्ण सुखाद्वये ।
शिवे विलीन सर्वात्मा योगी चलति न क्वचित् ॥ १७.२८॥
प्रध्वस्त वासनासङ्गात् प्राणवृत्ति परिक्षयात् ।
शिवै कीभूतसर्वात्मा स्थानुवद्भाति सण्यमी ॥ १७.२९॥

## २२. कायार्पण स्थलं

शिवस्य पररूपस्य सर्वानुग्राहिणोर्चने ।
त्यागो देहाभिमानस्य कायार्पणमुदाहृतं ॥ १७.३०॥
यदा योगी निजं देहं शिवाय विनिवेदयत् ।
तदा भवति तद्रूपं शिवरूपं न संशयः ॥ १७.३१॥
इन्द्रियप्रीति हेतूनि विषयासङ्ग जानि च ।
सुखानि सुखचिद्रूपे शिवयोगी निवेदयत् ॥ १७.३२॥
दर्शनात् स्पर्शनाद्भुक्तेः श्रवणाद्घ्राणनादपि ।
विषयेभ्यो यदुत्पन्नं शिवे तत्सुखमर्पयेत् ॥ १७.३३॥
देहद्वारेण यद्यत् स्यात् सुखं प्रासङ्ग मात्मनः ।
तत्तन्नि वेदयन् शम्भोर्योगि भवति निर्मलः ॥ १७.३४॥

## २३. करणार्पण स्थलं

अनञ्जनं समस्तानां करणानां परात्परे ।
शिवे यत्तदिदं प्रोक्तं करणार्पणमागमे ॥ १७.३५॥
यद्यत्करणमालम्ब्य भुङ्क्ते विषयजं सुखं ।
तत्तच्छिवे समर्प्यैष करणार्पक उच्यते ॥ १७.३६॥
अहङ्कारमदोद्रिक्त मन्तःकरणवारणं ।
बध्नीयाद्यः शिवालाने सधीरः सर्वसिद्धिमान् ॥ १७.३७॥
इन्द्रियाणां समस्तानां मनः प्रथममुच्यते ।


From http://sanskritdocuments.org

वशीकृते शिवे तस्मिन् किमन्यैस्तद्वशानुगै ॥ १७.३८ ॥
इन्द्रियाणां वशीकारो निवृत्तिरिति गीयते ।
लक्ष्यीकृते शिवे तेषां कुतः संसारगाहनं ॥ १७.३९ ॥
संसारविषकान्तारसमुच्छेदकुठारिका ।
उपशन्तिर्भवेत् पुंसामिन्द्रियाणां वशीकृतौ ॥ १७.४० ॥
इन्द्रियैरेव जायन्ते पापानि सुकृतानिच ।
तेषां समर्पणादीशे कुतः कर्मनिबन्धनं ॥ १७.४१ ॥
प्रकाशमाने चिद्वह्नौ बहिरन्तर्जगन्मये ।
समर्प्यविषयान् सर्वान् मुक्त वज्जायते जनः ॥ १७.४२ ॥
चित्तद्रव्यं समादाय जगज्जातं महाहविः ।
चिद्वह्नौ जुह्वतामन्तः कुतः संसारविप्लवः ॥ १७.४३ ॥
आत्मज्योतिषु चिद्रूपे प्राणवायु निबोधिते ।
जुह्वात् समस्त विषयान् तन्मयो भवतिध्रुवं ॥ १७.४४ ॥
इन्द्रियाणि समस्तानि शरीरं भोगसाधनं ।
शिवपूजाङ्गभावेन भावयन् मुक्ति माप्नुयात् ॥ १७.४५ ॥

## २४. भावर्पणस्थलं

शिवे निश्चलभावेन भावानां यत्समर्पणं ।
भावार्पणमिदं प्रोक्तं शिवसद्भाववेदिभिः ॥ १७.४६ ॥
चित्तस्थसकलार्थानां मननं यत्तुमानसे ।
तदर्पणं शिवे साक्षान्मानसो भावौच्यते ॥ १७.४७ ॥
भाव एव हि जन्तूनां कारणं बन्धमोक्षयोः ।
भावशुद्धौ भवेन्मुक्तिर्विपरीतेतु सम्वृतिः ॥ १७.४८ ॥
भावस्य शुद्धिराख्याता शिवो हमिति योजना ।
विपरीत समायोगे कुतो दुःखनिवर्तनं ॥ १७.४९ ॥
भोक्ता भोज्यं प्रेरयिता सर्वमेतच्चराचरं ।
भावयन् शिवरूपेण शिवो भवति वस्तुततः ॥ १७.५० ॥
सर्वं कर्मार्चनं शम्भोर्वचनं तस्य कीर्तनं ।
इति भावयतो नित्यं कथं स्यात् कर्म बन्धनं ॥ १७.५१ ॥
सर्वेन्द्रियगतं सौख्यं दुःखं वा कर्म सम्भवं ।
शिवार्थं भावयन् योगी जीवन्मुक्तो भविष्यति ॥ १७.५२ ॥

## २५. शिष्यस्थलं

शासनीयो भवेद्यस्तु परकायेन सर्वदा ।
तत्प्रसादात्तु मोक्षार्थी स शिष्य इति कीर्तितः ॥ १७.५३ ॥
भावो यस्य स्थिरो नित्यं मनोवाक्कयकर्मभिः ।
गुरौ निजे गुणोदारे स शिष्य इति गीयते ॥ १७.५४ ॥
शान्तो दान्तस्तपश्शीलः सत्यवाक् समदर्शनः ।


From http://sanskritdocuments.org

गुरौ शिवे समानस्थः स शिष्याणामिहोत्तमः ॥ १७.५५॥
गुरुमेव शिवं पश्येच्छिव मेव गुरुं तथा ।
नैतयोरन्तरं किञ्चिद्विजानीयाद्विचक्षणः ॥ १७.५६॥
शिवाचारे शिवध्याने शिवज्ञाने च निर्मले ।
गुरोरादेशमात्रेण परां निष्ठामवाप्नुयात् ॥ १७.५७॥
न लङ्घ येद्गुरोराज्ञां ज्ञानमेव प्रकाशयन् ।
शिवासक्तेन मनसा सर्वसिद्धिमवाप्नुयात् ॥ १७.५८॥
गुरोर्लब्ध्वा महाज्ञानं संसारामय भेषजं ।
मोदते यः सुखी शान्तः स जीवन्मुक्त एवहि ॥ १७.५९॥

२६. शुश्रूषस्थलं

बोध्यमानः स गुरुणा पराकायेन सर्वदा ।
तच्छुश्रूषारतः शिष्यः शुश्रूषुरिति कीर्त्यते ॥ १७.६०॥
श्रुत्वा श्रुत्वा गुरोर्वाक्यं शिवसाक्षात्क्रियावहं ।
उपशाम्यति यः स्वान्ते समुक्ति पदमाप्नुयात् ॥ १७.६१॥
न बुध्यति गुरोर्वाक्यं विनाशिष्यस्यमाननं ।
तेजो विना सहश्रांशोः कथं स्फुरति पङ्कजं ॥ १७.६२॥
सूर्यस्योदय मात्रेण सूर्यकान्तः प्रकाशते ।
गुरोरालोकमात्रेण शिष्यो बोधेन भासते ॥ १७.६३॥
अद्वैत परमानन्द प्रबोधैकप्रकाशकं ।
उपायंश्रुणुयाच्छिष्यः सद्गुरुम्प्राप्यसाञ्जलि ॥ १७.६४॥
किं तत्त्वं परमं ज्ञेयं केन सर्वे प्रतिष्ठिताः ।
कस्यसाक्षात्क्रिया मुक्तिः कथयेति समासतः ॥ १७.६५॥
इति प्रश्ने कृते पूर्वं शिष्येण नियतात्मना ।
ब्रूयात्तत्त्वं गुरुस्तस्मै येनस्यात्संसृतेर्लयः ॥ १७.६६॥
शिवएव परं तत्त्वं चिदानन्द सदाकृतिः ।
स यथार्थस्तदन्यन्य जगतो नास्ति नित्यता ॥ १७.६७॥
शिवोहमिति भावेन शिवे साक्षात्कृते स्थिरं ।
मुक्तोभवति संसार मोहग्रन्धिविभेदतः ॥ १७.६८॥
शिवं भावय चात्मानं शिवादन्यन्न चिन्तय ।
एवंस्थिरे शिवाद्वैते जीवन्मुक्तो भविष्यसि ॥ १७.६९॥
एवं प्रबोधितः शिष्यो गुरुणा गुणशालिना ।
शिवमेव जगत् पश्यन् जीवन्मुक्तोभिजायते ॥ १७.७०॥

२७. सेव्यस्थलं

गुरुवाक्यामृतास्वादात् प्राप्त बोधमहाफलः ।
शुश्रूषुरेवसर्वेषां सेव्यत्वात् सेव्य उच्यते ॥ १७.७१॥
गुरूपदिष्टे विज्ञाने चेतसि स्थिरतां गते ।



From http://sanskritdocuments.org

साक्षात्कृतशिवः शिष्यो गुरुवत्पूज्यते सदा ॥ १७.७२॥
ज्ञानाधिक्यसम्पत्ति र्गुरोर्यस्मादुपस्थिता ।
तस्माद् ज्ञानग माच्छिष्योगुरुवत्पूज्यतां व्रजेत् ॥ १७.७३॥
शिवोहमिति भावस्य नैरन्तर्यविशेषतः ।
शिवभावे समुत्पन्ने शिववत्पूज्य एव सः ॥ १७.७४॥
ब्रह्माण्डबुद्बुदोद्भासि मयासिन्धुं महत्तरं ।
गुरोः कबलयत्याशु कटाक्ष बडबानलः ॥ १७.७५॥
गुरोः कटाक्ष वेधेन शिवोभवति मानवः ।
रसवेधाद्यधा लोहो हेमतां प्रतिपद्यते ॥ १७.७६॥
विषयासक्त चित्तो पि विषयासङ्गवर्जितः ।
शिवभावयुतो योगी सेव्यः शिव इवापरः ॥ १७.७७॥
मुक्तः संशयपाशतः स्थिरमना भोधे च मुक्ति प्रदे ।
मोहं देहभृतां दृशा विघटयन्मूलं महा संस्मृते ॥ १७.७८॥
सत्तानन्द चिदात्मके निरुपमे शैवे परस्मिन् पदे ।
लीनात्मा विदितप्रपञ्चविभवोयोगी जनैः सेव्यते ॥ १७.७९॥
इति श्री सिद्धान्त शिखामणौ लिङ्गस्थलीय प्रसादिस्थले कायानुग्रहादि
नवविध स्थल प्रसङ्गोनाम सप्तदश परिच्छेदः परिसमाप्तः ॥१७॥

---

अष्टादश परिच्छेदः

अगस्त्य उवाच

प्रसादि स्थलसम्बद्धाः स्थलभेदाः प्रकीर्तिताः ।
प्राणलिङ्गस्थलरूढान् स्थल भेदान्निरूपय ॥ १८.१॥

श्री रेणुक उवाच

स्थलानां नवकं प्रोक्तं प्राणलिङ्गिस्थल श्रितं ।
आदावात्मस्थलं प्रोक्तमन्तरात्मस्थलं ततः ॥ १८.२॥
परमात्मस्थलं पश्चान्निर्देहागम संज्ञकं ।
निर्भावागमसंज्ञञ्च ततो नष्टागमस्थलं ॥ १८.३॥
आदिप्रसादिनामाध ततश्चान्त्यप्रसादिकं ।
सेव्य प्रसादिकं चाथश्रुणु तेषां हि लक्षणं ॥ १८.४॥

२८. आत्मस्थलं

जीवभावं परित्यज्य यदा तत्त्वं विभाव्यते ।
गुरोश्च बोधयोगेन तदात्मायं प्रकीर्तितः ॥ १८.५॥
वालाग्रशतभागेन सदृशोहृदये स्थितः ।
अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत् ॥ १८.६॥
आत्मापि सर्वभूताना मन्तः करणमाश्रितः ।



From http://sanskritdocuments.org

sanskritdocuments.org

अणुभूतो मलासङ्गादादिकर्मनियन्त्रितः ॥१८.७॥
अशरीरोपि सर्वत्र व्यापकोपि निरञ्जनः ।
आत्मा मायाशरीरस्थः परिभ्रमति संस्मृतौ ॥१८.८॥
आत्मस्वरूप विज्ञानं देहेन्द्रिय विभागतः ।
अखण्ड ब्रह्मरूपेण तदात्मप्राप्ति रुच्यते ॥१८.९॥
जपयोगाद्यथा रागः स्फटिकस्य मणेर्भवेत् ।
तथा हङ्कारसम्बन्धादात्मनो देहमानिता ॥१८.१०॥
न चास्ति देहसम्बन्धो निर्देहस्य स्वभावतः ।
अज्ञानकर्मयोगेन देही भवति भुक्तये ॥१८.११॥
नासौ देवो न गन्धर्वो न यक्षो नैव राक्षसः ।
न मनुष्यो न तिर्यक्ष्पन च स्थावर विग्रहः ।
तत्त च्छरीरयो गेन तत्तनाम्ना विराजते ॥१८.१२॥
नानाकर्म विपाकाश्च नानायोनिसमाश्रितः ।
नाना योग समापन्ना नाना बुद्धिविचेष्टितः ॥१८.१३॥
नाना मार्गसमारूढा नाना सङ्कल्प कारिणः ।
अस्वतन्त्राश्च किञ्चिज् ज्ञाः किञ्चित्कर्तृ हेतवः ।
लीलाभाजनतां प्राप्ताः शिवस्य परमात्मनः ॥१८.१४॥
चोदिताः परमेशेन स्वस्वकर्मानु रूपतः ।
स्वर्गं वा नरकं वापि प्राणिनो यान्ति कर्मिणः ॥१८.१५॥
पुनः कर्मावशेषेण जायन्ते गर्भ कोटरात् ।
जाता मृताः पुनर्जाताः पुनर्मरण भाजनाः ।
भ्रमन्ति घोर संसारे विश्रान्ति कथया विना ॥१८.१६॥
जीवत्वं दुःख सर्वस्वं तदिदं मलकल्पितं ।
निरस्यते गुरोर्बोधाद् ज्ञानशक्तिः प्रकाशते ॥१८.१७॥

२९. अन्तरात्मस्थलं

यदा निरस्तं जीवत्वं भवे द्गुर्वनुबोधतः ।
तदान्तरात्म भावोहि निरस्तस्य भवेद्ध्रुवं ॥१८.१८॥
देहस्थितो व्ययं जीवो देहसङ्ग विवर्जितः ।
बोधात् परमात्म भावित्वादन्तरात्मेति कीर्तितः ॥१८.१९॥
आत्मान्तरालवर्तित्वाज्जीवात्म परमात्मनोः ।
योगादुभय धर्माणा मन्तरात्मेति कीर्तितः ॥१८.२०॥
अहङ्कारस्य सम्बन्धान्मनुष्यत्वादिविभ्रमः ।
न स्वभाव इति ज्ञानादन्तरात्मेति कथ्यते ॥१८.२१॥
यथा पद्मपलाशस्य न सङ्गो वारिणा भवेत् ।
तथा देहजुषोस्यस्य न शरीरेण सङ्गतिः ॥१८.२२॥
नीडस्थितो यथा पक्षी नीडाद्भिन्नः प्रकाशते ।


From http://sanskritdocuments.org

देहस्थितस्थ थात्मायं देहदिन्य! प्रकाशते ॥१८.२३॥
आच्छाद्यते यथा चन्द्रो मेघैरासङ्गवर्जितः ।
तथात्मा देह सङ्घातैरनङ्गः परिवेष्टितः ॥१८.२४॥
निर्ममो निरहङ्कारो निरस्तोपाधि विप्लवः ।
देहस्थोपि सदा ह्यात्मा शिवं पश्यति योगतः ॥१८.२५॥
भोक्तुर्भोज्य परित्यागात् प्रेरकन्य प्रसादतः ।
भोक्तृ ता भोग गलितः स्फुरत्यात्मा स्वभावतः ॥१८.२६॥
सर्वेषां प्रेरकत्वेन शम्भुरन्तः स्थितः सदा ।
तत्पर ज्ञानयोगेन योगी नन्दति मुक्तवत् ॥१८.२७॥

३०. परमात्मस्थलं

निर्धूते तत्प्रभोदेन मले संसारकारणे ।
सामरस्यात् परात्मस्थः परमात्मयमुच्यते ॥१८.२८॥
सर्वेषामात्म भेदानामुत्कृष्टत्वात् स्वतेजसा ।
परमात्मा शिवःप्रोक्तः सर्वगोपी प्रकाशवान् ॥१८.२९॥
ब्रह्माण्डबुद्बुदस्तोमा यस्य मायामहोदधौ ।
उन्मज्जन्ति निमज्जन्ति परमात्मा स उच्यते ॥१८.३०॥
यस्मिन् ज्योतिर्गणाः सर्वेस्फुलिङ्गा इव पावका ।
उत्पद्य विलयं यान्ति तद्रूपं परमात्मनः ॥१८.३१॥
यस्मिन् समस्ततत्त्वानि कल्लोला इव वारिधौ ।
सम्भूय लयमायान्ति तद्रूपं परमात्मनः ॥१८.३२॥
निरस्तमल सम्बन्धमशेष जगदात्मकं ।
सर्वतत्त्वो परिप्रोक्तं स्वरूपं परमात्मनः ॥१८.३३॥
यथा व्याप्य जगत्सर्वं स्वभासा भाति भास्करः ।
तथा स्वशक्ति भिर्व्याप्य परमात्मा प्रकाशते ॥१८.३४॥
विश्वतो भावमानोपि विश्वमाया विलक्षणः ।
परमात्मा स्वयं ज्योतिरूपो जीवात्मनाम्भवेत् ॥१८.३५॥

३१. निर्देहागमस्थलं

देहिनोपि परात्मत्व भाविनो निरहङ्कृतेः ।
निरस्त देहधर्मस्य निर्देहागम उच्यते ॥१८.३६॥
शिवोहमिति यस्यास्ति भावना सर्वगामिनी ।
तस्य देहेन सम्बन्धः कथं स्यासमितात्मनः ॥१८.३७॥
गलिते कृत्रि माहन्त्वे संसारभ्रम कारणे ।
पराहन्तां प्रविष्टस्य कुतो देहःकुतो रतिः ॥१८.३८॥
निष्कले निष्प्रपञ्चौघे गभीरे चिन्महोदधौ ।
निमग्न मानसो योगी कथं देहं विचिन्तयेत् ॥१८.३९॥
अपरिच्छेद्यमात्मानं चिदम्बरमिति स्मरन् ।



From http://sanskritdocuments.org

देहयोगेपि देहस्थैर्विकारैर्न विलिप्यते ॥ १८.४०॥
अखण्डनं विदाकारमद्वितीयं सुखात्मकं ।
परमाकाशमात्मानं मन्वानः कुत्र मुह्यति ॥ १८.४१॥
उपाधिविहिता भेदा दृश्यन्ते चैकवस्तुनि ।
इति यस्य मतिः सोयं कथं देहमितो भवेत् ॥ १८.४२॥
भेदबुद्धिः समस्तानां परिच्छेदन्य कारणं ।
अभेदबुद्धौ जातायां परिच्छेदस्य का कथा ॥ १८.४३॥

३२. निर्भावागमस्थलं

व्यतिरेकात् स्वरूपस्य भावान्तरनिराकृतेः ।
भावो विकारनिर्मुक्तो निर्भावागम उच्यते ॥ १८.४४॥
अहं ब्रह्मेति भावस्य वस्तु द्वयसमाश्रयः ।
एकीभूतस्य चिद्व्योम्नि तदभावो विनिश्चितः ॥ १८.४५॥
एक भावेन रूढस्य निष्कलङ्के चिदम्बरे ।
क्व जाति वासनायोगः क्व देहित्वं परिभ्रमः ॥ १८.४६॥
शून्ये चिदम्बरे स्थाने दूरे वाङ्मानसाध्वनः ।
विलीनात्मा महायोगी केनकिम्वापि भावयेत् ॥ १८.४७॥
अविशुद्धे विशुद्धे वा स्थले दीप्ति र्यथा रवेः ।
पतत्येवं सदा द्वैती सर्वत्र समवृत्ति मान् ॥ १८.४८॥
न बिभेति जरामृत्योर्न क्षुधाया वशं व्रजेत् ।
परिपूर्ण निजानन्द समास्वादान्महासुखी ॥ १८.४९॥

३३. नष्टागमस्थलं

भेदशून्ये महाबोधे ज्ञात्रादित्रि यहानितः ।
ज्ञानस्य नष्टभावेन नष्टागम इहोच्यते ॥ १८.५०॥
अद्वैतवास नाविष्ट चेतसां परयोगिनां ।
पश्यतामन्तरात्मानां ज्ञातृत्वं कथमन्यथा ॥ १८.५१॥
अकर्ताहमवेत्ताहमदेहोहं निरञ्जनः ।
इति चिन्तयतः साक्षात् सम्विदेव प्रकाशते ॥ १८.५२॥
निरस्तभेद जल्पस्य निरीहस्य प्रशाम्यतः ।
स्वे महिम्नि विलीनस्य किमन्यद् ज्ञेयमुच्यते ॥ १८.५३॥
एकीभूते निजाकारे सम्विदा निष्प्रपञ्चया ।
केन किं वेदनीयं स्याद्वेत्ता कः परिभाष्यते ॥ १८.५४॥
महासत्ता महासम्विद्विश्वरूपा प्रकाशते ।
तद्विना नास्ति वस्त्वैकं भेद बुद्धिं विमुञ्चतः ॥ १८.५५॥

३४. आदिप्रसादि स्थलं

सर्वाधिष्ठातृकः शम्भुरादिस्तस्य प्रसादतः ।
आदि प्रसादीत्युक्तो यं निर्विकारपदे स्थितः ॥ १८.५६॥


From http://sanskritdocuments.org

अनेक जन्म शुद्धस्य निरहङ्कार भाविनः ।
प्रसन्नस्य महादेवः प्रसीदति विमुक्तये ॥ १८.५७॥
शिव प्रसादसम्पत्त्या शिवभावमुपेयुषा ।
शिवादन्यज्जगज्जालं दृश्यं ते न च दृश्यते ॥ १८.५८॥
शम्भोरेव प्रसादेन संसारच्छेदकारिणा ।
मोहग्रन्धिं विनिर्भिद्य मुक्तिं यान्ति विवेकिनः ॥ १८.५९॥
विनाप्रसादमीशस्य संसारो न निवर्तते ।
विना सूर्योदयं लोके कुतः स्यात्तमसो लयः ॥ १८.६०॥
सर्वानुग्राहकः शम्भुः केवलं कृपया प्रभुः ।
मोचयेत् सकलान् जन्तून्नकिञ्चिदिह कारणं ॥ १८.६१॥

३५. अन्त्य प्रसादि स्थलं

लयः सर्वपदार्थानामन्त्य इत्युच्यते बुधैः ।
प्रसादोनुभवस्तस्य तद्वानन्त्य प्रसादवान् ॥ १८.६२॥
देवतिर्यज्मनुष्यादि व्यवहारविकल्पना ।
मायाकृता परेतत्त्वे तल्लयेतत् क्षयोभवेत् ॥ १८.६३॥
साक्षात्कृते परे तत्त्वे सच्चिदानन्द लक्षणे ।
क्व पदार्थ परिज्ञानं कुतो ज्ञातृत्व सम्भवः ॥ १८.६४॥
सुषुप्तस्य यथावस्तु न किञ्चिदपि भासते ।
तथा मुक्तस्य जीवस्य न किञ्चिद्वस्तु दृश्यते ॥ १८.६५॥
यथाकाशमविच्छिन्नं निर्विकारं स्वरूपतः ।
तथा मुक्तस्य जीवस्य स्वरूपमव शिष्यते ॥ १८.६६॥
न किञ्चिदपि मुक्तस्य दृश्यं कर्तव्यमेव हि ।
सुखस्फूर्ति स्वरूपस्य निश्चला स्थिति रुच्यते ॥ १८.६७॥
शिवाद्वैत परिज्ञान शिथिला शेष वस्तुनः ।
केवलं सम्विदुल्लासदर्शिनः केन किं भवेत् ॥ १८.६८॥

३६. सेव्य प्रसादि स्थलं

सेव्यो गुरुः स्मततो ह्यास्य प्रसादोनुभवोमतः ।
तदेकावेश रूपेण तद्वान् सेव्य प्रसादवान् ॥ १८.६९॥
सेव्यो गुरुः समस्तावां शिव एव न संशयं ।
प्रसादोस्य परानन्दप्रकाशः परिकीर्त्यते ॥ १८.७०॥
गुरुरेव परं तत्त्वं परतत्त्वं गुरुःस्मृतः ।
तदेकत्वानुभावेन न किञ्चिदव शिष्यते ॥ १८.७१॥
अपरिच्छेद्यमात्मस्थ मवाङ्मानसगोचरं ।
आनन्दं पश्यतां पुंसां रतिस्यत्र का भवेत् ॥ १८.७२॥
ज्ञानामृतेन तृप्तस्य किमन्यैर्भोज्य वस्तुभिः ।
ज्ञानमेव परानन्दं प्रकाशयति यच्छिवं ॥ १८.७३॥


From http://sanskritdocuments.org

मुक्तिरेव परातृप्तिः परमानन्द लक्षणा ।
नित्यप्तस्य मुक्तस्यकिमन्यैर्भोग साधनैः ॥ १८.७४ ॥
न बाह्य कर्म तस्यास्ति न चान्तर्नैव कुत्रचित् ।
शिवैक्य ज्ञानरूढस्य देह भ्रान्तिं विमुञ्चतः ॥ १८.७५ ॥
न कर्मबन्धेन तपो विशेषे न मन्त्रयोगाभ्यसनेतथैव ।
ध्याने भोधे च तदात्मा तत्त्वे मनः प्रवृत्तिः परयोगभाजां ॥ १८.७६ ॥
इति श्री सिद्धान्त शिखामणौ लिङ्गस्थलीय प्राणलिङ्गि स्थले आत्मस्थलादि
नवविध स्थल प्रसङ्गोनाम अष्टादश परिच्छेदः परिसमाप्तः ॥१८ ॥

---

## एकोनविंशति परिच्छेदः

अगस्त्य उवाच

स्थलभेदाः समाख्याताः प्राणलिङ्गिस्थलाश्रयाः ।
कथय स्थलभेदं मे शरणस्थल संश्रितं ॥ १९.१ ॥

श्री रेणुक उवाच

शरणस्थलमाश्रित्य स्थलद्वादशकं मया ।
उच्यते नाम सर्वेषां स्थलानां श्रुणु तापस ॥ १९.२ ॥
दीक्षापादोदकं पूर्वं शिक्षापादोदकं ततः ।
ज्ञानपादोदकं चाध क्रियानिष्पत्तिकं ततः ॥ १९.३ ॥
भावनिष्पत्तिकं चाध ज्ञाननिष्पत्तिकं ततः ।
पिण्डाकाशस्थलं चाध बिन्द्वाकाशस्थलं ततः ॥ १९.४ ॥
महाकाशस्थलं चाध क्रियायाश्च प्रकाशनं ।
भावप्रकाशनं पश्चात्ततो ज्ञानप्रकाशनं ।
स्वरूपं पृथगेतेषां कथयामि यथाक्रमं ॥ १९.५ ॥

### ३७. दीक्षापादोदकस्थलं

दीक्षयोपगताद्वैतं यद् ज्ञानं गुरु शिष्ययोः ।
आनन्दस्यैक्यमे तेन दीक्षापादोदकं स्मृतं ॥ १९.६ ॥
परमानन्द एवोक्तः पादशब्देन निर्मलः ।
ज्ञानं चोदक शब्देन पादोदकमितिस्मृतं ॥ १९.७ ॥
अथवा पादशब्देन गुरुरेव निगद्यते ।
शिष्यश्चोदकशब्देन तयोरैक्यं तु दीक्षया ॥ १९.८ ॥
परसम्वित्प्रकाशात्मा परमानन्द भावनां ।
अधिगम्य महायोगी न भेदं क्वापि पश्यति ॥ १९.९ ॥
देशकालाद्यवच्छेद विहीनं नित्य निर्मलं ।
आनन्द प्राप्य बोधेन नान्यत् काङ्क्षति सण्यमि ॥ १९.१० ॥
ज्ञानामृत मतिस्वच्छं गुरुकारुण्यसम्भवं ।



From http://sanskritdocuments.org

आस्वाद्य रमते योगी संसारामयवर्जितः ॥१९.११॥

३८. शिक्षापादोदकस्थलं

गुरुशिष्यमयं ज्ञानं शिक्षामननमीर्यते ।
तयोः समरसत्वं हि शिक्षापादोदकं स्मृतं ॥१९.१२॥
मथिताच्छास्त्र जलधेर्युक्ति मन्थान वैभवात् ।
गुरुणा लभ्यते बोदिसुधा सुमनसां गणैः ॥१९.१३॥
ज्ञानचन्द्रसमुद्भूतां परमानन्द चन्द्रिकां ।
पश्यन्ति परमाकाशेमुक्ति रात्रौ महाधियः ॥१९.१४॥
दृष्टे तस्मिन् परानन्दे देश कालादिवर्जिते ।
द्रष्टव्यं विद्यते नान्य च्छ्रोतव्यं ज्ञेयमेववा ॥१९.१५॥
आत्मानन्देन तृप्तस्य का स्पृहा विषये सुखे ।
गङ्गाजलेन तृप्तस्य कूपतोये कुतोरतिः ॥१९.१६॥
यस्मिन्न प्राप्तकल्लोले सुखसिन्धौ निमज्जति ।
सामरस्यान्महायोगी तस्य सीमा कुतो भवेत् ॥१९.१७॥
गुरुप्रसादचन्द्रेण निष्कलङ्केन चारुणा ।
यन्मनः कुमुदं नित्यं बोधितं तस्य को भ्रमः ॥१९.१८॥

३९. ज्ञानपादोदकस्थलं

सदैक्यसम्पदानन्दो योसौ ज्ञानगुरुर्मतः ।
तत्सामरस्यं शिष्यस्य ज्ञानपादोदकं विदुः ॥१९.१९॥
अविद्याराहुनिर्मुक्तो जीवचन्द्रः सुनिर्मलः ।
प्रकाशते पराकाशे परानन्द महाद्युतिः ॥१९.२०॥
अज्ञानमेघनिर्मुक्तः पूर्णो जीवसुधाकरः ।
आनन्दजलधेर्वृद्धि मनुपश्यन् विभावते ॥१९.२१॥
अज्ञानचन्द्रोदये जाते ध्वस्त मोहत मोभराः ।
पश्यन्ति परमां काष्टां योगिनः सुखरूपिणीं ॥१९.२२॥
मायारजन्या विरये बोधसूर्ये प्रकाशिते ।
निरस्त सर्वव्यापाराश्चित्रं स्वपिति सण्यमी ॥१९.२३॥
अनाद्य विद्या विच्छित्ति वेलायां परयोगिनः ।
प्रकाशते परानन्दः प्रपञ्चेन विनाकृतः ॥१९.२४॥
नित्यानन्दे निराकारे निर्मले पर तेजसि ।
विलीन चेतसां पुंसां कुतो विश्वविकल्पना ॥१९.२५॥
कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः ।
साक्षात्कृत परानन्दज्योतिषः साम्यकल्पने ॥१९.२६॥
अपरोक्ष परानन्द विलासस्य महात्मनः ।
ब्रह्म विष्ण्वादयो देवा विशेषा सुख बिन्दवः ॥१९.२७॥
यन्मात्र सहितु लोके वाण्छन्ति विषयं नराः ।



From http://sanskritdocuments.org

तमप्रमेयमानन्दं परमं कोन वाण्छति ॥ १९.२८ ॥

४०. क्रिया निष्पत्तिस्थलं

ज्ञानिनो यानि कर्माणि तानिनो जन्महेतवः ।
अग्नि दग्धानि बीजानी यथा नाङ्कुरि कारणं ॥ १९.२९ ॥
कर्मणा किङ्कृतेनापि ज्ञानिनो निरहङ्कृतेः ।
विक्रिया प्रतिबिम्बस्था किं करोति हिमद्युतेः ॥ १९.३० ॥
ज्ञानी कर्मनिरूढोपि लिप्यते नक्रियाफलैः ।
घृतादिना यथा जिह्वा भोक्त्री चापि नलिप्यते ॥ १९.३१ ॥
निरस्तोपाधि सम्बन्धे जीवे या या क्रियास्थितिः ।
सा सा प्रतीतिमात्रेण निष्फला तत्रलीयते ॥ १९.३२ ॥
गच्छंस्तिष्ठन् स्वपन्वापि न निष्कर्मास्ति कश्चन ।
स्वभावो देहिनां कर्म ज्ञानिनां तत्तु निष्फलं ॥ १९.३३ ॥
परिपूर्णमहानन्द भाविनः शुद्धचेतनः ।
न भवेत् कर्म कार्पण्यं नाना भोगफलप्रदं ॥ १९.३४ ॥

४१. भावनिष्पत्तिस्थलं

भावेन नास्तिसम्बन्धः केवल ज्ञानियोगिनः ।
तथापि भावं कुर्वीत शिवे संसारमोचके ॥ १९.३५ ॥
परिपूर्ण प्रबोधोपि भावं शम्भौ न वर्जयेत् ।
भावो हि निहितस्तस्मिन् भवसागरतारकः ॥ १९.३६ ॥
निवर्त्य जन्मजं दुःखं भावः शैवो निवर्तते ।
यथा कष्टादिकं दग्ध्वा स्वयं शाम्यति पावकः ॥ १९.३७ ॥
प्रकाशिते शिवानन्दे तद्भावैः किं प्रयोजनं ।
सिद्धे साध्येचिरेणापि साधनैः किं प्रयोजनं ॥ १९.३८ ॥
एकीकृते शिवेभावे ज्ञानेन सहसण्यमी ।
विस्मृतात्मा समावेशः शिवभावे विभानते ॥ १९.३९ ॥
न भावेन विना ज्ञानं न भावो ज्ञानमन्तरा ।
मोक्षायकारणं प्रोक्तं तस्मादुभयमाश्रयेत् ॥ १९.४० ॥

४२. ज्ञाननिष्पत्तिस्थलं

परिपूर्णे महानन्दे परमाकाशलक्षणे ।
शिवे विलीन चित्तस्य कुतो ज्ञेयान्तरे कथा ॥ १९.४१ ॥
ज्ञाता चाहं ज्ञेयमिदमिति व्यवहृतिः कुतः ।
अभेधब्रह्म सारस्ये निरस्ताःलवस्तुनि ॥ १९.४२ ॥

४३. पिण्डाकाशस्थलं

यथा पिण्डस्थ आकाशस्थथात्मा पूर्ण उच्यते ।
एतदर्थ विवेकोयः पिण्डाकाशस्थलं विदुः ॥ १९.४३ ॥
घटोपाधिर्यथाकाशः परिपूर्णः स्वरूपतः ।



From http://sanskritdocuments.org

तथा पिण्डस्थितोह्यात्मा परिपूर्णः प्रकाशते ॥ १९.४४॥
अन्तःस्थितं पराकाशं शिवमद्वैतलक्षणं ।
भायेद्यः सुमनसा पिण्डाकाशः सौच्यते ॥ १९.४५॥
शिवागारमिदं प्रोक्तं शरीरं बोधदीपितं ।
षट्त्रिंशत्तत्वघटितं सुमनः पद्मपीठकं ॥ १९.४६॥
पराकाश स्वरूपोहि प्रकाशः परमेश्वरः ।
हृदाकाशगुहालीनो दृश्यतेऽन्तः शरीरिणां ॥ १९.४७॥
एतच्छिवपुरं प्रोक्तं सप्तधतु समावृतं ।
अत्र हृत्पङ्कजं वेश्म सूक्ष्माम्बरमनोहरं ॥ १९.४८॥
तत्र सन्निहितः साक्षात् सच्चिदानन्दलक्षणः ।
नित्यसिद्धः प्रकाशात्मा जलस्थाकाशवच्चिवः ॥ १९.४९॥
अन्तराकाशमध्यस्थमशेषोपाधिवर्जितं ।
घटाकाशमिवाच्छिन्नं भावयेच्चिन्मयं शिवं ॥ १९.५०॥

## ४४. बिन्द्वाकाशस्थलं

यथाकाशो विभुर्ज्ञेयः सर्वप्राण्युपरिस्थितः ।
तथात्मेत्युपमानार्थं बिन्द्वाकाशस्थलं विदुः ॥ १९.५१॥
यथैकोवायुराख्यातः सर्वप्राणिगतोविभुः ।
तथात्मा व्यापकः साक्षात् सर्वप्राणिगतः स्वयं ॥ १९.५२॥
यथा वह्निरमे यात्ना सर्वत्रैकोपिभावते ।
तथाशम्भुः समस्तात्मा परिच्छेद विवर्जितः ॥ १९.५३॥
सर्वेषान्देहिनामन्त श्चित्ततोयं प्रकाशते ।
तस्मिन् प्रतिफलत्यात्मा शिवो दर्पणवद्विभुः ॥ १९.५४॥
एकः परिमितः सम्वित्प्रकाशात्मा परात्परः ।
सर्वप्राणिगतो भाति तथापि विभुरुच्यते ॥ १९.५५॥
एकएव यथा सूर्यस्तेजसा भाति सर्वगः ।
तथात्मा शक्तिभेदेन शिवः सर्वगतोभवेत् ॥ १९.५६॥

## ४५. महाकाशस्थलं

पिण्डाण्डस्थं यथाकाशं नभिन्नं तद्वदात्मनः ।
अभिन्नः परमात्मेति महाकाशस्थलं विदुः ॥ १९.५७॥
यथान भिन्न माकाशं घटेषु च मठेषु च ।
तथाण्डेषु च पिण्डेषु स्थितो ह्यात्मा न भिद्यते ॥ १९.५८॥
अनिर्देश्यमनौपम्य मवाङ्मानसगोचरं ।
सर्वतो मुखसम्पन्नं सत्तानन्द चिदात्मकं ॥ १९.५९॥
कलातीतं कलातीतं क्रमयोगादिवर्जितं ।
स्वानुभूतिप्रमाणस्थं ज्योतिषामुदयस्थलं ॥ १९.६०॥
शिवाख्यं परमं ब्रह्म परमाकाशलक्षणं ।


From http://sanskritdocuments.org

लिङ्गमित्युच्यते सद्भिर्यद्विना न जगत्स्थितिः ॥ १९.६१॥
परमाकाशमव्यक्तं प्रबोधानन्दलक्षणं ।
लिङ्गं ज्योतिर्मयं प्राहुर्लीयन्तेयत्रयोगिनः ॥ १९.६२॥
सम्विदेव पराकाष्ठा परमानन्दरूपिणी ।
तामाहुः परमाकाशं मुनयो मुक्तसंशयाः ॥ १९.६३॥
तरङ्गादिर्यथा सिन्धोः स्वरूपान्ना तिरिच्यते ।
तथा शिवात् पराकाशाद्विश्वमेतन्न भिद्यते ॥ १९.६४॥
यथा पुष्पपलाशादिर्वृक्षरूपान्न भिद्यते ।
तथा शिवात्पराकाशाज्जगतौ नास्ति भिन्नता ॥ १९.६५॥
यथा ज्योतीम्षि भासन्ते भूताकाशे पृथक् पृथक् ।
तथा भान्ति पराकाशे ब्रह्माण्डानि विशेषतः ॥ १९.६६॥
निरस्तोपाधिसम्बन्धं निर्मलं सम्विदात्मकं ।
पराकाशं जगच्चित्र विलासालम्ब भित्तिकं ॥ १९.६७॥

४६. क्रिया प्रकाशस्थलं

शिवस्य परिपूर्णस्य पराकाश स्वरूपिणः ।
आत्मत्वेनानुसन्धानात् क्रियाद्योतनवान् यमि ॥ १९.६८॥
निष्कलङ्कचिदानन्दगग नोपमरूपिणः ।
शिवस्य परिपूर्णस्य वृत्तिश्चैतन्यरूपिणः ॥ १९.६९॥
निष्कलङ्के निराकारे नित्ये परमतेजसि ।
विलीनचित्तवृत्तस्य तथा शक्तिः क्रियोच्यते ॥ १९.७०॥
सर्वज्ञः सर्वकर्ता च सर्वगः परमेश्वरः ।
तदैक्यचिन्तया योगी तादृशात्मा प्रकाशते ॥ १९.७१॥
सर्वेन्द्रियाणां व्यापारे विद्यमानेपि सण्यमी ।
प्रत्यङ्मुखेन मनसा शिवं प्रश्यन् प्रमोदते ॥ १९.७२॥
कूटस्थमचलं प्राज्ञं गुणातीतं गुणोत्तरं ।
शिवतत्त्वं स्वरूपेण पश्यन् योगी प्रमोदते ॥ १९.७३॥

४७. भावप्रकाशस्थलं

तरङ्गाद्यायथा सिन्धोर्न भिद्यन्ते तथात्मनः ।
भावा बुद्ध्यादयः सर्वे यत्तद्भावप्रकाशनं ॥ १९.७४॥
शिवएव जगत्सर्वं शिवएवाहमित्यपि ।
भावयन् परमो योगी भवदोषैर्न बाध्यते ॥ १९.७५॥
शिवभावे स्थिरे जाते निर्लेपस्य महात्मनः ।
येये भावाः समुत्पन्ना स्ते ते शिवमयाः स्मृताः ॥ १९.७६॥
अद्वितीयशिवाकारभावनाध्वस्तकर्मणा ।
न किञ्चिद्भाव्यते साक्षाच्छिवादन्यन्महात्मना ॥ १९.७७॥
गलिता ज्ञानबन्धस्य केवलात्मानुभाविनः ।


From http://sanskritdocuments.org

यत्र यत्रेन्द्रियासक्तिस्तत्र तत्र शिवात्मता ॥१९.७८॥
रागद्वेषादयो भावाः संसारक्लेश कारणं ।
तेषेमुपरमो यन्त्र तत्र भावः शिवात्मकः ॥१९.७९॥
यथा सूर्यसमाक्रान्ता न शक्नोति तमः सदा ।
तथा प्रकाशमात्मानं ना विद्या क्रमतिस्वयं ॥१९.८०॥

४८. ज्ञानप्रकाशस्थलं

मुक्तस्यज्ञानसम्बन्धो ज्ञेयाभावः स्वभावतः ।
उपाधि सहितं ज्ञानं न भेदमतिवर्तते ॥१९.८१॥
ज्ञानस्यविषये तत्त्वे शिवाख्ये चित्सुखात्मनि ।
आत्मैकत्वानु सन्धानं ज्ञानमित्युच्यते बुधैः ॥१९.८२॥
अपरिच्छिन्नमानन्दं सत्ताकारं जगन्मयं ।
ब्रह्मेति लक्षणज्ञा ब्रह्मज्ञानमिहोच्यते ॥१९.८३॥
ब्रह्मज्ञाने समुत्पन्ने विश्वश्चोपाधि विवर्जिते ।
सर्वं सम्विन्मयं भाति तदन्यन्नै वदृश्यते ॥१९.८४॥
तस्मादद्वैत विज्ञानमपवर्गस्य कारणं ।
भावयन् सततं योगी संसारेण नलिप्यते ॥१९.८५॥
नित्ये निर्मलसत्त्व योगिनि परे निर्वासने निष्कले ।
सर्वातीतपदे चराचरमये सत्तात्मनि ज्योतिषि ॥
सम्विद्व्योम्नि शिवे विलीन हृदयस्तद्भेद वैमुख्यतः ।
साक्षात्सर्वगतो विभाति विगलद्विश्वः स्वयंसण्यमी ॥१९.८६॥
इति श्री सिद्धान्त शिखामणौ लिङ्गस्थलीय शरणस्थले दीक्षापादोदक स्थलादि द्वादशविधस्थल प्रसङ्गोनाम एकोनविंशति परिच्छेदः परिसमाप्तः ॥१९॥

---

## विंशतितम परिच्छेदः

अगस्त्य उवाच

स्थलभेदास्त्वया प्रोक्ताः शरणस्थल संश्रिताः ।
ऐक्यस्थलगतान् ब्रूहि स्थलभेदान् गणेन्द्र मे ॥२०.१॥

श्री रेणुक उवाच

स्थलानां नवकं चैक्यस्थलेस्मिन् परिकीर्त्यते ।
तत्स्वीकृत प्रसादाख्यस्थलमादौ प्रकीर्तितं ॥२०.२॥
शिष्टादनस्थलं चाथ चराचरलयस्थलं ।
भाण्डस्थलं ततः प्रोक्तं भाजनस्थलमुत्तमं ॥२०.३॥
अङ्गालेपस्थलं पश्चात् स्वपराज्ञस्थलं ततः ।
भावाभावविनाशं च ज्ञानशून्यस्थलं ततः ।
तदेषां क्रमशो वक्ष्ये श्रुणु तापसतलक्षणं ॥२०.४॥



From http://sanskritdocuments.org

४९. स्वीकृतप्रसाद स्थलं

मातृमेय प्रमाणादिव्यवहार विहारिणीं ।
सम्वित्साक्षात्कृतिं लब्ध्वायोगी स्वात्मनि तिष्ठति ॥ २०.५॥
अद्वैत बोध निर्धूत भेदावेशस्य योगिनः ।
साक्षात्कृतमहासम्वित्प्रकाशस्य क्व बन्धनं ॥ २०.६॥
चिदात्मनि शिवे न्यस्तं जगतेतच्चराचरं ।
दृश्यते तन्मयं सर्वमग्नौ काष्ठादिकं यथा ॥ २०.७॥
न भाति पृथ्वी न जलं न तेजो नैव मारुतः ।
वाकाशो ना परं तत्त्वं शिवे दृष्टे चिदात्मनी ॥ २०.८॥
ज्योतिर्लिङ्गे चिदाकारे ज्वलत्यन्तर्निरन्तरं ।
विलीनं निखिलं तत्त्वं पश्यन् योगी नलिप्यते ॥ २०.९॥
अन्तर्मुखेन मनसा स्वात्मज्योतिषि चिन्मये ।
सर्वानप्यर्थ विषयान् जुह्वाद्योगी प्रमोदते ॥ २०.१०॥
सच्चिदानन्द जलधौ शिवे स्वात्मनि निर्मलः ।
समर्प्य सकलान् भुङ्क्ते विषयांस्त त्प्रसादतः ॥ २०.११॥

५०. शिष्टौदनस्थलं

प्रकाशयते या सर्वेषां माया सैवौदनाकृतिः ।
लीयते यत्र चिल्लिङ्गे शिष्टं तत्परिकीर्तितं ॥ २०.१२॥
जगत्यस्मिन् परिग्रस्ते माया पाश विजृम्भिते ।
स्वात्मज्योतिषि बोधेन तदेकमवशिष्यते ॥ २०.१३॥
अखण्डसच्चिदानन्द परब्रह्मस्वरूपिणः ।
जीवन्मुक्तस्य धीरस्य माया कैङ्कर्यनादिनी ॥ २०.१४॥
विश्वसम्मोहिनी माया बहुशक्तिर्निरङ्कुशा ।
शिवैक्यत्वमुपेतस्य न पुरः स्थातुमिहते ॥ २०.१५॥
ज्योतिर्लिङ्गे चिदाकारे निमग्नेन महात्मना ।
भुज्यमाना यथा योगं नश्यन्ति विषयाःस्वतः ॥ २०.१६॥
शब्दादयोपि विषया भुज्यमानास्तदिन्द्रियै ।
आत्मन्येन विलीयन्ते सरितः सागरे यथा ॥ २०.१७॥
अर्थ जात मशेषं तु ग्रसन् योगी प्रशाम्यति ।
स्वात्मनीव स्थितं भानुस्तेजो जालमशेषतः ॥ २०.१८॥

५१. चराचरलयस्थलं

लिङ्गैक्येतु समापन्ने चराचरजगल्लये ।
निर्देहिच भवेद्योगी चराचरविनाशकः ॥ २०.१९॥
यथा मेघाः समुद्भूता विलीयन्ते नभःस्थले ।
तथाननात्म निविलीयं ते विषयाः स्वानुभाविनः ॥ २०.२०॥
जाग्रत्स्वप्नसुषुप्तिभ्यः परावस्थामुपेयुषः ।



From http://sanskritdocuments.org

किं वा प्रमाणं किं ज्ञेयं किं वा ज्ञानस्य साधनं ॥ २०.२१॥
तुर्यातीत पदं यत्त द्दूरं वाङ्मनसाध्वनः ।
अनुप्रविश्य तद्योगी न भूमो विश्वमीक्षते ॥ २०.२२॥
नान्यत्पश्यति योगीन्द्रो नान्यज्जानति किञ्चन ।
नान्यच्छृणोति सन्दृष्टे चिदानन्दमये शिवे ॥ २०.२३॥

५२. भाण्डस्थलं

ब्रह्माण्डशतकोटीनां स्वर्गस्थितिलयान् प्रति ।
स्थानभूतो विमर्शो यस्तद्भाण्डस्थल मुच्यते ॥ २०.२४॥
विमर्शाख्या पराशक्ति र्विश्वो द्भावनकारिणी ।
साक्षिणी सर्वतत्त्वानं समिन्धे सर्वतो मुखी ॥ २०.२५॥
विश्वं यत्र लयं यान्ति विभात्यात्मा चिदाकृतिः ।
सदानन्दमयः साक्षात् सा विमर्शमयी कला ॥ २०.२६॥
सराहन्ता समावेश परिपूर्ण विमर्शवान् ।
सर्वज्ञः सर्वगः साक्षी सर्वकर्ता महेश्वरः ॥ २०.२७॥
विश्वाधारं महासम्वित्प्रकाशपरिपूरितं ।
पराहन्तामयं प्राहुर्विमर्शं परमात्मनः ॥ २०.२८॥
विमर्शभाण्ड विन्यस्त विश्वतत्त्व विजृम्भणः ।
अनन्यमुख सम्प्रेक्षी मुक्तः स्वात्मनि तिष्ठति ॥ २०.२९॥

५३. भाजनस्थलं

समस्त जगदण्डानां स्वर्गस्थित्यन्त कारणं ।
विमर्शोभासते यत्र तद्भाजन मिहोच्यते ॥ २०.३०॥
विमर्शाख्या पराशक्ति र्विश्ववैचित्र्यकारिणी ।
यस्मिन् प्रतिष्ठिता ब्रह्म तदिदं विश्वभाजनं ॥ २०.३१॥
यथा चन्द्रे स्थिरा जोत्स्ना विश्व वस्तु प्रकाशिनी ।
तथा शक्ति र्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा ॥ २०.३२॥
वृक्षस्थं पत्र पुष्पादि वटबीजस्थितं यथा ।
तथा हृदयबीजस्थं विश्वमेतत्परात्मनः ॥ २०.३३॥
आकारः शिव आख्यातो हङ्कारः शक्ति रुच्यते ।
शिवशक्ति मयं ब्रह्म स्थितमेकमहं पदे ॥ २०.३४॥
अहन्तां परमां प्राप्य शिवशक्तिमयीं स्थिरां ।
ब्रह्मभूयं गतो योगी विश्वात्मा प्रतिभासते ॥ २०.३५॥
अन्तःकरणरूपेण जगदङ्कुररूपतः ।
यस्मिन् विभाति चिच्छक्ति र्ब्रह्मभूतः स उच्यते ॥ २०.३६॥

५४. अङ्गालेपस्थलं

दिक्कालाद्यनवच्छिन्नं चिदानन्दमयं महत् ।
यस्यरूपमिदङ्ख्यातं सोङ्गालेप इहोच्यते ॥ २०.३७॥



From http://sanskritdocuments.org

समस्त जगदात्मापि सम्विद्रूपो महामतिः ।
लिप्यतेनैव संसारैर्यथा धूमादिभिर्नभः ॥ २०.३८ ॥
न देवत्वं न मानुष्यं नतिर्यक्त्वं न चान्यथा ।
सर्वाकारत्व माख्यातं जीवन्मुक्तस्ययोगिनः ॥ २०.३९ ॥
नविधिर्न निषेधश्च न विकल्पो न वासना ।
केवलं चित्स्वरूपस्य गलित प्राकृतात्मनः ॥ २०.४० ॥
अनश्वमरनिर्देश्यं यथा व्योम प्रकाशते ।
तथा ब्रह्मापि चैतन्यमत्र वैशेषिकी कला ॥ २०.४१ ॥
घटादिषु पृथग्भूतं यथाकाशं न भिद्यते ।
तथोपादिगतं ब्रह्म नानारूपं न बिध्यते ॥ २०.४२ ॥

५५. स्वपराज्ञस्थलं

दिक्कालाद्यवच्छिन्न तेजो रूपसमाश्रयात् ।
स्वपरज्ञानविरहात् स्वपराज्ञस्थलं विदुः ॥ २०.४३ ॥
आप्रमेये चिदाकारे ब्रह्मण्यद्वैत वैभवे ।
विलीनः किं सुजानति स्वात्मानं परमेव वा ॥ २०.४४ ॥
यत्रनास्ति भिदा योगादहं त्वमिति विभ्रमः ।
न सण्योगो वियोगश्च न ज्ञेयज्ञातृकल्पना ॥ २०.४५ ॥
न बन्धो न च मुक्तिश्च न देवाद्यभिमानिता ।
न सुखं नैव दुःखं च नाज्ञानं ज्ञानमेववा ॥ २०.४६ ॥
नोत्कृष्टत्वं न हीनत्वं नो परिष्टान्न चाप्यथः ।
न पश्चान्नैव पुरतो न बाह्यञ्च न चान्तरं ॥ २०.४७ ॥
सर्वाकारे चिदानन्दे सत्यरूपिणि शाश्वते ।
पराकाशमये तस्मिन् परब्रह्मणि निर्मले ॥ २०.४८ ॥
एकभावमुपेतानां योगिनां परमात्मनां ।
परापरपरिज्ञान परिहास कथा कुतः ॥ २०.४९ ॥

५६. भावाभावलयस्थलं

प्रतीयमानौ विद्येते भावाभावौ न कुत्रचित् ।
लिङ्गैक्ये सति यत्तस्माद्भावाभावलयस्थलं ॥ २०.५० ॥
अहम्भावस्य शून्यत्वादभावस्य तथात्मनः ।
भावाभावविनिर्मुक्तो जीवन्मुक्तः प्रकाशते ॥ २०.५१ ॥
सुखदुःखादियोगेषु ना भावोभाव एव वा ।
विद्यते चित्स्वरूपस्य निर्लेपस्य महात्मनः ॥ २०.५२ ॥
त्वन्ताहन्ता विनिर्मुक्ते निर्विकल्पे चिदम्बरे ।
एकीभूतस्य सिद्धस्य भावाभावकथा कुतः ॥ २०.५३ ॥

५७. ज्ञानशून्यस्थलं

परस्परसमापेक्ष भावाभावविवेचनं ।



From http://sanskritdocuments.org

ज्ञानं ब्रह्मणि यन्नास्ति ज्ञानशून्यस्थलं विदुः ॥ २०.५४॥
सर्वात्मनि परेतत्त्वे भेदशङ्काविवर्जिते ।
ज्ञात्रादिव्यवहारोत्थं कुतो ज्ञानं विभाव्यते ॥ २०.५५॥
निर्विकारं निराकारं नित्यं सीमाविवर्जितं ।
व्योमवत्परमं ब्रह्म निर्विकल्पतया स्थितं ॥ २०.५६॥
न पृथ्व्यादीनी भूतानि न ग्रह नैव तारकाः ।
न देवा न मनुष्याश्च न तिर्यञ्चोनचापरे ॥ २०.५७॥
तस्मिन् केवल चिन्मात्र सत्तानन्दैकलक्षणे ।
त्वन्ताहन्तादि सम्रूढं विज्ञानं केन भाव्यते ॥ २०.५८॥
केवलं सच्चिदानन्दप्रकाशद्वयलक्षणं ।
निर्विकल्पं पराकाशं परब्रह्म प्रकाशते ॥ २०.५९॥
ज्योतिर्लिङ्गे चिदाकारे स्वप्रकाशे नरिन्तरे ।
एकीभावमुपेतस्य कथं ज्ञानस्य सम्भवः ॥ २०.६०॥
जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितः ।
परब्रह्माणि लीनात्मा विभागेन सदृश्यते ॥ २०.६१॥
एतावदुक्त्वा परमप्रबोध मद्वैत मानन्द शिवप्रकाशम् ।
देव्यै पुरा भाषित मीश्वरेण तूष्णीमभूद्ध्यानपरो गणेन्द्रः ॥ २०.६२॥
एवमुक्त्वा समासीनं शिवयोग परायणं ।
रेणुकं तं समालोक्य बभाषे प्राञ्जलिर्मुनिः ॥ २०.६३॥
अगस्त्य उवाच
शिवयोग विशेषज्ञ शिवज्ञान महोदधे ।
समस्त वेदशास्त्रादिव्यवहारधुरन्धर ॥ २०.६४॥
अलोक मात्र निर्धूतसर्व संसार बन्धन ।
स्वच्छन्द चरितोल्लास स्वप्रकाशात्मा वच्छिव ॥ २०.६५॥
अवतीर्णमिदं शास्त्रमनवद्यं त्वदाननात् ।
श्रुत्वामे मोदते चित्तं ज्योतिः पश्यच्छिवाभिदं ॥ २०.६६॥
अद्यमे सफलं जन्मगतो मे चित्तविभ्रमः ।
सञ्जाता पाश विच्छित्ति स्तपांसि फलितानिमे ॥ २०.६७॥
इदानि मेवमे जातं मुनिराजत्वमुत्तमं ।
इतः परं मया नास्ति सदृशो भुवनत्रये ॥ २०.६८॥
शास्त्रं तव मुखोद्गीर्णं शिवाद्वैतपरं परं ।
मां विना कस्य लोकेषु श्रोतुमस्तितपः शुभं ॥ २०.६९॥
तपनः परिपाकेन शङ्करस्य प्रसादतः ।
आगतस्त्वं महाभाग मां कृतार्थयितुङ्गिरा ॥ २०.७०॥
इतिस्तुम्वन्तं विनयादगस्त्यं मुनिपुङ्गवं ।
आलोक्य करुणादृष्ट्या बभाषे स गणेश्वरः ॥ २०.७१॥


From http://sanskritdocuments.org

श्री रेणुक उवाच

अगस्त्यमुनि शार्दूल तपसिद्धमनोरथ ।
त्वां विना शिवशास्त्रस्य कः श्रोतुमधिकारवान् ॥ २०.७२॥
पात्रं शिवप्रसादस्य भवानेको न चापरः ।
इति निश्चित्य कथितं माया ते तन्त्रामीदृशं ॥ २०.७३॥
स्थाप्यतां सर्वलोकेषु तन्त्रमेतत्त्व या मुने ।
ई दृशं शिवभोदस्य साधनं नास्ति कुत्रचित् ॥ २०.७४॥
रहस्य मेतत् सर्वज्ञः सर्वानुग्राह कः शिवः ।
अवादीत् सर्वलोकानां सिद्धये पार्वतीपतिः ॥ २०.७५॥
तदिदं सर्वसिद्धान्त साराणा मुत्तमोत्तमं ।
वेद वेदान्त सर्वस्वं विद्याचारप्रकाशकं ॥ २०.७६॥
वीरमाहेश्वरग्राह्यं शिवाद्वैत प्रकाशकं ।
परीक्षितेभ्यो दातव्यं शिष्येभ्यो नान्यथा क्वचित् ।
एतच्छ्रवणमात्रेण सर्वेषां पापसङ्क्षयः ॥ २०.७७॥
अवतीर्णं मयाभूमौ शास्त्रस्यास्य प्रवृत्तये ।
प्रवर्तय शिवाद्वैतं त्वमपि ज्ञानमीदृशं ॥ २०.७८॥
इत्युक्त्वा पश्यतस्तस्य पुरास्तादेव रेणुकः ।
अन्तर्धदे महादेवं चिन्तयन्नन्तरात्मना ॥ २०.७९॥
अन्तर्हिते तदातस्मिन् मुनिराश्चर्यसङ्कुलः ।
तच्छास्त्रप्रवणो भूत्वा समवर्तत सण्यमि ॥ २०.८०॥
य इदं शिव सिद्धान्तं वीरशैवमतात्मकं ।
श्रुणोति शुद्ध मनसा स याति परमां गतिं ॥ २०.८१॥
इति श्री सिद्धान्त शिखामणौ लिङ्गस्थलीय यैक्यस्थलौ स्वीकृतप्रसाद स्थलादि नवविधस्थल प्रसङ्गोनाम विंशतितम परिच्छेदः परिसमाप्तः ॥२०॥

---

एकविंशतितम परिच्छेदः

विभीषणाभिष्ठ वरप्रदानं

स्वच्छन्दाचार रसिकः स्वेच्छानिर्मितविग्रहः ।
अपसाद पुरीं लङ्कां रेणुको गणनायकः ॥ २१.१॥
तमागतं महाभागं सर्वागमविशारदं ।
विभीषणःसमालोक्य सौधं प्रावेशयन्निजं ॥ २१.२॥
भद्रासने महारम्ये निवेश्य गणनायकं ।
अर्घ्यपाद्यादिभिः सर्वैरुपचारैरपूजयत् ॥ २१.३॥
पूजितेन प्रसन्नेन रेणुकेन निरूपितः ।
निषसाद तदभ्यासे स निजाननमाश्रितः ॥ २१.४॥


From http://sanskritdocuments.org

विभीषणो गणेन्द्रं तमाबभाषे कृताञ्जलिः ।
मानुषाकारसम्पन्नं साक्षाच्चिवमिवापरं ॥ २१.५ ॥
रेणुक त्वं गणाधीश शिवज्ञानपरायण ।
अवतीर्णो महीमेनामिति सम्यक् श्रुतं मया ॥ २१.६ ॥
मद्भाग्य गौरवादद्य समयास्त्यं पुरीमिमां ।
कथभाग्य विहीनानां सुलभाः स्युर्भवादृशाः ॥ २१.७ ॥
मत्समो नास्ति लोकेषु भाग्यातिशयवत्तया ।
यस्य सौधं स्वयं प्राप्तो भवान् साक्षान्महेश्वरः ॥ २१.८ ॥
कृतार्थामे पुरी ह्येषा कृतार्थो राक्षसान्वयः ।
जीवितं च कृतार्थं मे यस्य त्वं दृष्टिगोचरः ॥ २१.९ ॥
इति ब्रुवानं कल्याणं राक्षसेन्द्रं गणेश्वरः ।
बभाषे सस्मितो वाणीं विश्वोल्लासकरीं शुभां ॥ २१.१० ॥
विभीषणममाभाग जाने त्वां धर्मकोविदं ।
त्वां विनाकस्य लोकेषु जायते भक्ति रीदृशी ॥ २१.११ ॥
समस्त शास्त्र पारंज्ञं सर्व धर्म परायणं ।
आध्यात्मा विद्यानिरतमाहुस्त्यां राक्षसेश्वर ॥ २१.१२ ॥
त्वदीयधर्मसम्पत्तिं श्रुत्वाहं विस्मिताशयः ।
प्रजन् कैलासमचलं त्वदन्तिक मुपागतः ॥ २१.१३ ॥
प्रीतोस्मितव चारित्रैः शोभ निर्लोकविश्रुतैः ।
दास्यामि ते वरं साक्षात् प्रार्थयस्व यथेप्सितं ॥ २१.१४ ॥
इति प्रसादमुखे भाषमाणे गणेश्वरे ।
प्रणम्य परया प्रीत्या व्याजहार विभीषणः ॥ २१.१५ ॥
आगमानु ग्रहादेव भवतः शिवयोगिनः ।
दुर्लभाः सर्वलोकानां समपद्यन्त सम्पदः ॥ २१.१६ ॥
तथापि प्रार्थनीयं मे किञ्चिदस्ति गणेश्वर ।
सुकृते परिपक्वे हि स्वयं सिद्ध्यति वाण्छितं ॥ २१.१७ ॥
रावणोहि मम भ्राता शिवभक्तशिखामणिः ।
अदृष्टशत्रुसम्बाधं शपास हि जगत्त्रयं ॥ २१.१८ ॥
यस्य प्रतापमतुलं सोढुमक्षमशक्तयः ।
इन्द्रादयः सुराः सर्वे राज्यलक्ष्म्या वियोजिताः ॥ २१.१९ ॥
स तु कालवशेनैव स्वचारित्र विपर्ययात् ।
रणे विष्णवावतारेण रामेण निहतो भवेत् ॥ २१.२० ॥
न तु रामशराविद्धः कण्ठस्खलित जीवितः ।
अवशिष्टं समालोक्य मामवादित् सुदुःखितः ॥ २१.२१ ॥
विभीषण विशेषज्ञ महाबुद्धे सुधार्मिक ।
अवशिष्टोसि वंशस्य रक्षसां भाग्यगौरवात् ॥ २१.२२ ॥


From http://sanskritdocuments.org

वयमज्ञानसम्पन्ना महत्सुद्रोहकारिणः ।
ईदृशीं तु गतिं प्राप्ता दुस्तारा हि विधिस्थितिः ॥ २१.२३ ॥
नवकं लिङ्गकोटीनां प्रतिष्ठाप्यमिहस्थले ।
इति सङ्कल्पितं पूर्वं मया तववशिष्यते ॥ २१.२४ ॥
कोटिषट्कन्तु लिङ्गानां मया साधु प्रतिष्ठितं ।
कोटि त्रयन्तु लिङ्गानां स्थापनीयमतस्त्वया ॥ २१.२५ ॥
इति तस्य वचः श्रुत्वा दीन बुद्धे र्मरिष्यतः ।
तथा साधु करोमीति प्रतिज्ञातं मया तथा ॥ २१.२६ ॥
युगवच्छिवलिङ्गानां कोटित्रयमनुत्तमं ।
प्रतिष्ठाप्यं यथाशास्त्रमिति मे निश्चयोभवत् ॥ २१.२७ ॥
लिङ्गकोटि त्रयस्येह युगपत् स्थापनाविधौ ।
अविदन्नेक माचार्यमहामेवमवस्थितः ॥ २१.२८ ॥
शिवशास्त्र विशेषज्ञ शिवज्ञान निधिर्भवान् ।
आचार्य भावमासाद्यमम पूरय वाण्छितं ॥ २१.२९ ॥
तस्येति वचनं श्रुत्वा राक्षसेन्द्रस्य धीमतः ।
तथेति प्रतिशुश्राव सर्वज्ञो गणनायकः ॥ २१.३० ॥
तत्र सन्तुष्टचित्तस्य पौलस्त्य न्येष्ट सिद्धये ।
कोटित्रयन्तु लिङ्गानां यथा शास्त्रं यथा विधि ।
त्रिकोटाचार्य रूपेण स्थापितं तेन तत् क्षणे ॥ २१.३१ ॥
तादृशं तस्यमाहत्म्यं समालोक्य विभीषणः ।
प्रणनाम मुहुर्भक्त्या पादयोस्तस्य विस्मितः ॥ २१.३२ ॥
प्रणतं विनयोपेतं प्रहृष्टं राक्षसेश्वरं ।
अनुगृह्य स्वमाहत्म्या द्रेणुकोऽन्तर्हितोभवत् ॥ २१.३३ ॥
विभीषणोपि हृष्टात्मा रेणुकस्य प्रसादतः ।
शिवभक्ति रसासक्तः स्थिरं राज्यमपालयत् ॥ २१.३४ ॥
रेणुकोपि महातेजाः सञ्चरन् क्षितिमण्डले ।
प्रच्छन्नश्च प्रकाशश्च परमाद्वैतभावतः ॥ २१.३५ ॥
कांश्चिद्दृष्टिनिपातेन करुणारसवर्षिणा ।
अपरानुपदेशेन शिवाद्वैताबिमर्शिना ॥ २१.३६ ॥
आन्यांश्च सहवासेन समस्त मलहारिणा ।
कृतार्थयन् जनान् सर्वान् कृतिनः पक्वकर्मिणः ॥ २१.३७ ॥
दर्शयित्वा निजाधिक्यं शिवदर्शनलालसः ।
खण्डायित्वादुराचारान् पाषाण्डान् भिन्नदर्शनान् ॥ २१.३८ ॥
यन्त्र मन्त्र कलाविद्धान् विमतान् सिद्ध मण्डलान् ।
विजित्य स्वप्रभावेण स्थापयित्वा शिवागमान् ।
अजगाम निजावासं कुल्यपाकाभिदस्थलं ॥ २१.३९ ॥


From http://sanskritdocuments.org

तत्र सम्भावितः सर्वैर्जनैः शिवपरायणैः ।
सोमनाथाभिधानस्य शिवस्य प्रापमन्दिरं ॥ २१.४० ॥
पश्यतां तत्र सर्वेषां भक्तानां शिवयोगिनां ।
तन्वानो विस्मयं भावैस्तुष्टाव परमेश्वरं ॥ २१.४१ ॥
देव देव जगन्नाथ जगत्कारणकारण ।
ब्रह्मविष्णुसुराधीश वन्द्यमानपदाम्बुज ॥ २१.४२ ॥
समस्त वेद वेदान्त परिबोधित वैभव ।
संसार वैद्य सर्वज्ञ सर्वशक्ति निरङ्कुश ॥ २१.४३ ॥
सच्चिदानन्द सर्वस्य परमाकाश विग्रह ।
समस्त जगदाधार ज्योतिर्लिङ्ग विजृम्भण ॥ २१.४४ ॥
गुणत्रयपदातीत मतत्रय विनाशन ।
जगत्रय विलासात्मन् श्रुतित्रयविलोचन ॥ २१.४५ ॥
पाहिमां परमेशान पाहिमां पार्वतीपते ।
त्वथाज्ञया मयैतावत्काल मात्रं महीतले ।
आचारि भव दुक्ताना मगमानां प्रसिद्धये ॥ २१.४६ ॥
इतः परं स्वरूपं ते प्राप्तुकामोस्मि शङ्कर ।
अन्तरं देहि मे किञ्चिदनुकम्पाविशेषतः ॥ २१.४७ ॥
इत्युक्ते गणनायकेन सहसा लिङ्गात्ततः शङ्करो ।
वत्सागच्छमहानुबाव भवतोभक्त्याप्रसन्नोस्म्यहं ।
इत्युच्चैरगदद्वचस्त सुभृतामाश्चर्य मासीत्तदा ।
दिव्यो दुन्दुभिराननाद गगनेपुष्पं ववर्षुर्गणाः ॥ २१.४८ ॥
श्रुत्वा लिङ्गाद्वचनमुदितं शाङ्करं सानुकम्पं ।
सम्हृष्टात्मा गणपतिरथो ज्योतिषा दीप्यमानः ।
जातोत्कण्ठैः शिवमनुपरैर्योगिभिः स्तूयमानो ।
ज्योतिर्लिङ्गं परममविशत् स्वप्रकाशं तदानीं ॥ २१.४९ ॥
लीने तस्मिन् शाङ्करेस्वप्रकाशे दिन्याकारेरेणुके सिद्धनाथे ।
सर्वोलोके विस्मितोन भूत्तदानीं शैवी भक्तिः स प्रमाण बभूव ॥ २१.५० ॥
श्रीवेदागम वीरशैवसरणिं श्री षट्स्थलोद्यन्मणिं ।
श्री जीवेश्वर योग पद्मतरणिं श्री गोप्य चिन्तामणिं ।
श्री सिद्धान्त शिखामणिं लिखातियस्तं लेख यत्यादरात् ।
श्रोता श्रावयिता स याति विमलां भुक्तिं च मुक्तिं परां ॥ २१.५१ ॥
इति श्री सिद्धान्त शिखामणौ विभीषणाभिष्ट वर प्रदान प्रसङ्गोनाम
एकविंशतितम परिच्छेदः परिसमाप्तः ॥२१॥

श्री सिद्धान्त शिखामणिः समाप्तः ॥


From http://sanskritdocuments.org

See http://en.wikipedia.org/wiki/Siddhanta_Shikhamani
Contains the preachings of Jagaduru Renukacharya according to vIrashaiva sampradAya
Audio at
http://www.shrisiddhanthashikhamani.com/downloads/shri-siddhantha-shikhamani-audio

---

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.

sanskritdocuments.org



From http://sanskritdocuments.org